PAGE(S)MISSING

NOT AVAILBLE

FOLIO NOS.
1-37

दि॥ यथा ब्राह्मणादीनामुक्तान् धर्मान् कोप्येककरोति भाग
वतधर्मान् श्रवण-नामसंकीर्तनादिलक्षणान् करोति
स तत्फलं प्राप्नुयादिति भावः॥ अध्यासेनानुष्ठितान् ब्राह्मण
त्वादिस्वभावाद्यत्करोतीत्यर्थः॥ तत्सकलं परस्मै परमेश्वरा
यत्ति यत्समर्पयेत् तथा च ति सकलभागवतधर्मकृ
तीति भावः॥ ननु किमेवं परमेश्वरभजनेन अज्ञानं कश्चि
त्तस्य भयस्य ज्ञानैकनिवर्त्यत्वादित्याशंक्याह भयं द्विती
याभिनिवेशतस्स्यादी : शादपेतस्य विपर्ययोस्मृतिः
तन्माययातो बुध आभजेत्तं भक्त्यैकयेशं गुरुदेव

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

गुरुदेवतात्मा॥ यतो न यं तन्मायया भवेत् अतो बुधो बुद्धिमान् तमेव
भजेत॥ ननु भयं देहाद्युत्पत्तिनिवृत्तिशालितो भवति स च देहाहंकारतः स्व
च स्वरूपास्मरणात॥ किमत्र तस्य माया करोति॥ अत आह॥ ईशाद
पेतस्येति ईशाद्विमुखस्य तन्मायया अस्मृतिः भगवत्स्वरूपास्फूर्ति
स्ततो विपर्ययो देहोस्मीति ततो द्वितीयाभिनिवेशाद्भयं भवति
एवं हि प्रसिद्धासु लोकिकीष्वपि मम मायासु॥ तदुक्तं गीतासु दैवी
ह्येषा गुणमयी मम माया दुरत्यया॥ मामेव ये प्रपद्यंते मायामे ३८
तां तरंति ते॥ एकयाहं अव्यभिचारिणी भक्त्या भजेत॥ गुरुदे
वतात्मा गुरुरेव देवता ईश्वरः आत्मा प्रेष्ठश्च यस्य तथादृष्टिः स

न्नित्यर्थः ननु विषयस्य विद्यमानस्य अतो व्यभिचारिणी भक्तिः संभवति
कुतस्तरां भयं तत्रस्तत्संभवता वद्धिष्ययो नाम भवास्तवोस्ति किंतु म
नो विलासमात्रमतो मनोतियमनेन भजनादभयं स्यादित्याह
अविद्यमानोप्यवभातिहि द्वयोर्ध्यातुर्धियास्वप्नमनोरथौ तद्वत्क
र्मसंकल्पकिंकल्पं मनो बुद्धिनिरंध्यस्तदभयं ततः स्यात॥ द्वयः दे
तत्प्रपंचः ध्यातुः उंसो धियाम न सास्वप्नश्च मनोरथश्च यथेत्यर्थः
तस्मात्कर्माणि संकल्पयति विकल्पयति कर्मसंकल्पविकल्प
कं॥ एतादृशं यन्मनस्तन्निरुध्यात् नियच्छेत् ततश्चैकया भक्त्या
तदुक्ता भयं स्यादित्यर्थः॥ एतदेव तं ताशाक्य मित्याशंक्य सुगम

मार्गमाह॥ शृण्वन् सुभद्राणि रथांगपाणेर्जन्मानि कर्माणि च यानि लो
के॥ गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसंगः॥ तद
र्थकानि जन्मानि कर्माणि च अर्थो एषां तानि एतान्यपि साकल्ये
न ज्ञातुमशक्यानीत्याशंक्याह॥ यानि लोके गीतानि प्रसिद्धा
नि शृण्वन् गायंश्च विचरेत्॥ असंगो निस्पृहः एवं॥ भजतेः संप्राप्तप्रेम
लक्षणभक्तियोगस्य संसारधर्मातीतां गतिमाह॥ एवंव्रतः स्वप्रिय
नामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः॥ हसत्यथो रोदिति रौति ३५
गायत्युन्मादवन्नृत्यति लोकबाह्यः॥ एवंव्रतं व्रतं यस्य सः स्वप्रि
यस्य हरेर्नामकीर्त्या जातानुरागः प्रेम यस्य सः॥ अत एव द्रु

तचित्तः अथ द्रुतहृदयः॥ कदाचिद्भक्तपराजितं भगवंतमाकल्प्य उच्चैर्ह
सति एतावंतं कालमुपेक्षितोऽस्मीति रोदिति॥ औत्सुक्याद्रौ
ति क्रोशति॥ प्रतिहर्षेण गायति॥ जितं जितमिति नृत्यति॥ किं दांभि
कवत्परान् प्रति प्रकाशार्थं न उन्मादवत् ग्रहग्रहीतवत् लोकबा
ह्यः विवशः किंच॥ खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दि
शो द्रुमादीन्॥ सरित्समुद्रांश्च हरेः शरीरं यत्किंच भूतं प्रणमेदनन्यः
सत्त्वानि भूतानि आकाशादीनि यत्किंचिद्भूतमात्रं हरेः शरीरं
मत्वा प्रणमेत् संभावनायां लिङ् नन्वीयमारूढयोगानामपि
बहुजन्मसाध्या दुर्लभा गतिः कथं नामसंकीर्तनमात्रेण क

स्मिन्नेव जन्मनि भवेदित्याशंक्य सदृष्टांतमाह ॥ भक्तिः परेशानुभ-
वो विरक्तिरन्यत्र चैष त्रिक एककालः ॥ प्रपद्यमानस्य यथाश्न-
तः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासं ॥ प्रपद्यमानस्य नामसंकी-
र्तनादिना हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परेशानुभवः
भगवद्रूपस्फूर्तिस्तया निर्वृतस्यान्यत्रानंदितस्य ततोऽन्यत्र गृहा-
दिषु विरक्तिरित्येष त्रिकः एककालः भजनसमकाल एव स्या-
त् यथाश्नतो भुंजानस्य पुंसस्तुष्टिः सुखं पुष्टिरुदरभरणं ५
क्षुन्निवृत्तिश्च प्रतिग्रासं स्युरुपलक्षणमेतत् प्रतिसिक्थमपि
तथा स्युस्तद्वत् एकैकस्मिन् भजने प्रेमादि त्रिकं जा-

यमाने अनुवृत्त्या भजतः परमप्रेमादि जायते बहुकृद्ग्रासभोजि-
न इव परमतुष्ट्यादि इति तथा च भगवत्प्रसादेन कृतार्थो भवतीत्याह
इत्यच्युतांघ्रिं भजतोऽनुवृत्त्या भक्तिर्विरक्तिर्भगवत्प्रबोधः
भवंति वै भागवतस्य राजन् ततः परां शांतिमुपैति साक्षात्
इदं वातिगुह्यं त्वयैव वक्तव्यमित्युद्धवः पृच्छति तं प्रति श्री-
भगवानुवाच मदर्थे धर्मकामार्थानाचरन्मदुपाश्रयः ॥
लभते निश्चलां भक्तिं मय्युद्धव सनातने ॥ आचरन् सेवमानः
मदर्थं मत्प्रीत्यर्थं मदाश्रयः ॥ अहमेव अपाश्रयो यस्य
सः ॥ धर्मांतरमाह ॥ आज्ञायैवं गुणान् दोषान् मयादिष्टा

नपिस्वकान्॥धर्मान्संत्यज्य यः सर्वान्मां भजेत्स सत्तमः॥ ज्ञात्वाज्ञा
त्वथ ये वै मां यावान्यश्चास्मि यादृशः॥ भजंत्यनन्यभावेन ते मे भ
क्ततमा मताः॥ क्रमेण श्लोकद्वयस्यार्थमाह॥ मया वेदरूपेणादि
ष्टान पि स्वधर्मान्संत्यज्य यो मां भजेत्सोपि एवं सर्वाङ्क एव स
त्तमः॥ किमज्ञानान्नास्तिक्याद्वा नेत्यधर्मं चरणे सत्त्वशुध्यादीन्गु
णान्विपदे दोषांश्च ज्ञात्वापि मद्ध्यानादिविक्षेपकतया मद्भक्त्यै
व सर्वं भविष्यतीति दृढनिश्चयेनैव धर्मान्संत्यज्य यद्वा तत्क्रियादर्श
नि वृत्ताधिकारतया संत्यज्य अथवा विद्धैकादशीत्येका
दश्युपवासोनुपवासोत्र निवेद्यश्राद्धादयो ये तत्क्रिविरु ५१

१८

धर्मांस्तान्संत्यजेत्यर्थः किंच यावान्देशकालाद्यपरिच्छिन्नयश्चस
र्वात्मा यादृशः सच्चिदानंदादिरूपस्तं मामज्ञात्वापि यद्वा विशेषतः ज्ञा
न: अज्ञात्वा वा एकांतभावेन ये मां भजंतीति साधुलक्षणमुक्तं
प्रकृतमनुसरति वैष्णवो वैष्णवान्दृष्ट्वा प्रणमेद्दंडवद्भुवि उच्चयो
रं नरा विष्णुः शंखचक्रगदाधरः आलिंगनं ततः कार्यं वैष्णवाः
परया मुदा स्मरन्संस्मारयन्विष्णुनामान्युच्चारयन्हरेः यतो वैष्णव
सान्निध्यमात्रेण नरस्य पापिनः सद्गतिस्तत्रालिंगनेन भवतीति
किमाश्चर्यमित्याह समीपे तिष्ठते यस्य ह्यंतकालेपि वैष्णवः
स गच्छेद्वैष्णवं स्थानं यद्यपि ब्रह्महा भवेत् तदुक्तं वामदेवे

नारदीयपुराणे हरिभक्तिपरायेश्च हरिनामपरायणाः वर्णा वा वर्णा बा
धायोत्तेषां नित्यं नमो नमः संसारसागरं तर्तुं य इच्छेत्पुरुषोत्तमः सम
र्चयेद्भक्तानां भक्तस्तु पापहारकः स्वपन्भुंजन्व्रजन्तिष्ठन्नुत्तिष्ठंश्च
वदंस्तथा यो वक्ति हरिनामानि तस्मै नित्यं नमो नमः एवं भूतान्
हरिभक्तान् भ्रान्तभक्तान् भ्रान्तभक्ता उपहसंति त्याद्व एकादशी रज
स.घोरसंकष्याः का मुक्ता अहिमन्यवः दांभिकामानिः पापा
दे.त्यक्त प्रियात्त श्रियाविष्णुस्यान्निजनेन वियास्या ग ५२
नसूपे एवं चेन कर्मणा ज्ञातस्मयनोधधियः स्वहेश्वरान्सतो व
मन्यंति हरेः प्रियवल्लभाः तथा पुराणरहस्ये व्यासो वाच कव

र्वन्नेकुर्वन्नगोविंदस्यानुकीर्त्तनं यः कश्चित्पुरुषो भाति सो
सवैर्न लिप्यते नृसिंहपुराणे मार्कंडेयोवाच यत्र यत्र च
स्नत्सोन्नसिंहस्तत्र रक्षति गच्छंस्तिष्ठन्नुत्स्वपन्भुंजन्
जाग्रन्नपि हसन्नपि नृसिंहेति नृसिंहेति नृषिंहेति प
दास्मरन् शुभान्न लिप्यते पापैर्मुक्तिस्तु क्तिं च विंदति नारद
नगतामे तिसो ता ग्यं च सुरूपतां नर्तुः प्रियवल्लजन्तेन
वेधव्यं च विंदन्ति मस्तपत्नी च जन्मांते समध्यात्नी द्विजोत्त
वित्त वृहन्नारदीये श्रीनारद उवाच चांडालोपि भगवद्भक्तो
लोकान् पुनातीत्याह स्मृतः संभाषितो वापि पूजितो वा द्वि

...षेकः विष्णुभक्तिविहीनस्तु ब्राह्मणः श्वपचाधमः श्रीमहा
भारते श्रीविष्णुवचनं नशूद्रा भगवद्भक्ता विप्रा भागवताः स्मृ
ता सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने चांडालं मम भक्तं
वा नावमन्येत बुद्धिमान् अवमन्य विनश्यन्ति रौरवं नरकं
व्रजेत् श्रीभागवतेपि विप्राद्द्विषड्गुणयुतादरविंदनाभपाद
रविंदविमुखाच्छ्वपचं वरिष्ठं मन्ये तदर्पितमनोवचनेहितार्थ
प्राणं पुनाति स कुलं न तु भूरिमानः क्षमा दमस्तपः शौ
चमार्जवं विरक्तता ज्ञानविज्ञानसंतोषः सत्यास्तिक्यं द्वि ४३
षड्गुणाः न भूरिमानो बहुमानो ब्राह्मणश्चेद्देवे स्त्रवः

सत्यं च ... शाहीनः भगवद्भक्तः श्वपचस्तु विप्राधिक इति व्यासस्याका
लिप्रायः द्वितीयश्लोकेन स एवाभिप्रायो वर्ण्यते अहो बत श्व
पचोतो गरीयान्यज्जिह्वाग्रे वर्त्तते नाम तुभ्यं तेपुस्तपस्ते जुहुवुः स
स्नुरार्या ब्रह्मानूचुर्नाम गृणंति ये येषां त्वं भवनाम गृणंति जिह्वा
ग्रे यं ति तैः श्वपचैरपि तपोदानाध्ययनसर्वतीर्थस्नानफलं प्रा
प्तं यद्वा तैर्जन्मांतरेषु सर्वमेव नक्षत्रांगधनादिकं संपादितं तेन
त्वतोस्मिञ्जन्मनि त्वन्नामसंकीर्त्तनं कुर्वंतिस्म सर्वदा इति कार
णात्तेनाभागवता अश्रेष्ठ इत्यर्थः विष्णुधर्मोत्तरे जन्मांतरसह
स्रेषु तपोदानसमाधिभिः नराणां क्षीणपापानां कृष्णेभक्तिः

प्रजापतेगीतासु। अपिचेत्सुदुराचार इत्यादिनाच। अनास्मिन्ग्रंथे
यत्रपुनरुक्तिःसातुप्रकरणभङ्ग्यार्थान्तरोक्तिप्रवृत्तिविश्वासाय
चेन्नसदोषः। रेवाखंडेभगवद्वचनं नमेप्रियश्चतुर्वेदीमद्भक्तः
श्वपचःप्रियः। तस्मैदेयंततोग्राह्यंसचपूज्योयथाह्यहमिति
प्रकारेण। जीवितंविष्णुभक्तस्यवरंपंचदिनानिच। नतुकल्पस
हस्राणिभक्तिहीनस्यकेशवे। अभक्तस्यअयंसूर्यःउदयास्त
मानाभ्यांपृथ्वेवायुर्हरतीत्याह। तदुक्तंभागवते आयुर्हरति ४४
वैपुंसामुद्यन्नस्तंचयन्नसौ। तस्यर्तेयत्क्षणोनीतउत्तमश्लोक
वार्तया। यत्क्षणःयःकालःउत्तमश्लोकोहरिस्तस्यवार्तया

श्लोकार्थः यदिजीवितमात्रंपुरुषार्थइतिचेत्तत्राह। तरवःकिं
नजीवंतिभस्त्राःकिंनश्वसंत्युत। नखादंतिनमेहंतिकिंग्राम्या
पशवोपरेवदंतिच। दारुकिंनचलस्यंगकिंनश्वसंतिभस्त्रि
का। कश्चिद्धीराननवदतिसजीवत्वंनतावता। कदाचिदपिह
रिकथांनशृणोतियःश्वादिभ्यःइत्याह। श्वविड्वराहोष्ट्रख
रैःसंस्तुतःपुरुषःपशुः नयत्कर्णपथोपेतोजातुनामगद
ग्रजः। श्रीकृष्णइत्यर्थः। ननुहरिभजनेप्रयासइतिचेत्तत्रा
ह। नह्यच्युतंप्रीणयतोबह्वायासोसुरात्मजाः। आत्म
त्वात्सर्वभूतानांसिद्धत्वादिहसर्वतः इहजगतिसिद्धत्वाद

स्तित्वात्सर्वतः सर्वश्रेष्ठत्वात्तत्प्रयासइत्यर्थः हरिस्तकैः स्तुल
मत्वमाह ॥ तदुक्तं विष्णुपुराणे ॥ स्तानि विष्णुर्भुवनानि विष्णुर्वना
नि विष्णुर्गिरयो दिशाश्च पृथ्वी समुद्राः सरितश्च सर्वा यदस्ति य
न्नास्ति च विष्णुरेवइत्युक्तत्वात् ॥ किंच कोतिप्रयासो सुख
लकाहरेरूपास्यस्वेष्टदिष्टिद्रव्यस्तः ॥ स्वस्यात्मनः ॥ सरम
रक्षोषदेहिनां समसामान्यतः किंविषयोपपादनैः ॥ इष्टदिष्टिद्रव
न्नष्टदयाकाशवत्सरूपमित्रस्यस्वस्य अशेषदेहिनां चात्म ५५
नः ॥ एवंभूतस्य हरेरुपासने तत्कोदे अस्तुर बाद्धकाको
तिप्रयासः नकोपीत्यर्थः ॥ एवंस्पति अत्तजनपुरुषांम

नुष्ठतत्तुल्यइत्याह नारदीयपुराणे मानुष्यं दुर्लभं प्राप्य यो हरिना
र्चयेन्नरः ॥ तस्मान्मूर्खतरः कोपि कोन्यस्तस्मादचेतनः ॥ नको
पीत्यर्थः ॥ भागवते च यः ॥ प्राप्यमानुषं लोकं मुक्तिद्वारमपावृ
तं ॥ गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः ॥ स्वकृतश्लोकः ॥ श्रीम
न्नृसिंहरघुनाथहरेमुकुंदराजजीवलोचनरघूत्तमकृष्ण विष्णो
राजाधिराजपुरुषोत्तमचक्रपाणे त्वं मोचयिष्यसि कदा नववं
धनान्मां ॥ इति श्रीरामनाममाहात्म्ये चक्रश्रम चिरंरचिते चतुर्थप्र
करणं ॥ ॥श्री॥ ॥ सर्वप्रकरणे वैष्णवमहिमा नारदीयपुराणे श्री

महाभागवते श्रीभगवद्भक्तानुभक्ते इदानीं वसिष्ठस्मृत्युक्तान् वै
ष्णवधर्मान् ॥ गुरुमिक्ष्वाकुवंशस्य वशिष्ठं ब्रह्मसंभवं पप्र
च्छुर्मुनयः सर्वे पराशरपुरोगमाः भगवन् भवता प्रोक्ता यज्ञ
दानव्रतादयः ॥ वर्णाश्रमाणां कर्तव्यास्तथा राज्ञां महीभृतां च
धुना प्रोक्तमिच्छामो विप्राणां विष्णुसेविनां कीदृग्विधाः प्रक
र्तव्या नित्यनैमित्तिकाः क्रियाः वैष्णवानां मुनिश्रेष्ठ ब्रूहि
सर्वमशेषतः ॥ वशिष्ठ उ ॥ शृणुध्वं मुनयः सर्वे सर्वधर्मस ५६
नातनं वैष्णवानां च विप्राणां यद्यदाचरणं शुभं ॥ स्वर्गा

णो ब्राह्मणाः श्रेष्ठा वैष्णवांशेन नोदिताः इतरे च तयो वर्णा ब्र
ह्मणा विष्णुसूनुना ॥ तथा च वैष्णवा विप्राः प्रशस्ता द्विज
सत्तमाः अवैष्णवं विप्राणां महापातकसंमितं ॥ अवैष्णवस्तु
यो विप्रः सर्वकर्मसु गर्हितः ॥ रौरवं नरकं प्राप्य चांडाली यो
निमाप्नुयात् ॥ नित्यं नैमित्तिकं काम्यं त्रिविधं श्रुतिनोदितं ॥
अवैष्णवानां विप्राणां कर्म तन्निष्फलं भवेत् ॥ यो महाविष्णु
मन्येन हीनं देवेन दुर्मतिः ॥ साधारणं स्मरेच्चैव तेसोत्पजानां
त्पजोत्पजः ॥ यो विष्णुव्यापमात्मानमन्यदेवेषु प्रपद्यते स चां
डालो महापापी रौरवं नरकं व्रजेत् ॥ अवैष्णवं च विप्राणां

आत्मनाशनकारणं तस्मात्तु वैष्णवं द्विजं हि विप्राणामुक्तिनोदि
तं अवैष्णवो हतो विप्रो हतं श्राद्धमदक्षिणं अब्राह्मण्यं ह
तं क्षत्रं अनाचारं हतं कुलं न दास्या वासुदेवस्य सर्वलोके
श्वरस्य च तेषां हि नरके वासः कल्पायुतशतैरपि चक्रवर्त्ति
चये विप्रो वासुदेवं न विंदति वेदपारगराक्षो गताः सर्वे
ब्राह्मणा गर्दभाः तस्माद्वैष्णवत्वेन ब्राह्मण्यादि विदाय
ते वैष्णवत्वेन सर्वं सिद्धं भवतीत्यत्र संशयः नारायणं ४७
परं ब्रह्म ब्राह्मणानां हि दैवतं सोमसूर्यादयो देवाः क्षत्रि
याणां विशामपि शूद्रादीनां तु रुद्राद्या अर्चनीयाः प्रकी

र्त्तितः यत्र रुद्रार्चनं प्रोक्तं पुराणेषु स्मृतिष्वपि तद्ब्राह्मणविष
यमेवमाह प्रजापतिः तथा च बृहदारण्यके यान्येतानि दे
वक्षत्राणि इंद्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशा
न इति तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते अन्यापि श्रु
तिः स विशमसृजत यान्येतानि देवजातानि गणश आख्या
यंते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति तथा च भाग ८
वते मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ नारायणक
लाः शांता भजंति ह्यनसूयव इत्यादि रुद्राद्याः भैरवादयः
भूतपतीन् भैरवादीन् तेषां मोक्षदात्वाभावात्त

थोक्तं भगवता । येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः । तेपि मा
मेव कौंतेय यजंत्यविधिपूर्वकं । अविधिरज्ञानं तत्पूर्वकमि
त्यर्थः । रुद्रार्चनं त्रिपुंड्रं च यत्पुराणेषु गीयते तत्त्रिविद् द्वि
जातीनां नेतरेषां तदुच्यते । तस्मात्त्रिपुंड्रं विप्राणां न धार्यं
मुनिसत्तमाः । यद्यज्ञानात्तु बिभ्रयुः पतितास्ते न संशयः
स्मृत्यंतरे च । शूद्राद्यंकं गजननं चगारं च त्रिपुंड्रकं । मात्समे
केप्येममानो ब्राह्मणो ब्रह्महा भवेत् तु । ऊर्ध्वपुंड्रं तु विप्रा ५८
णां स्मृतं ते श्रुतिनोदितं । ऊर्ध्वपुंड्रं मृदा शुभ्रं ललाटे य
स्य दृश्यते । सर्वपापविशुद्धात्मा स याति हरिमंदिरं । त

था चाथर्वणी श्रुतिः । धृतोर्ध्वपुंड्रो दरचक्रधारी मृदां विष्णुं ध्याय
ति यो महात्मा स याति नाकं दुरितं विधूय विशंति यद्वतयो
वीतरागा इति । अस्यार्थः । यः पुरुषो वैष्णवः शुभ्रया मृदा दात्तव
धृतोर्ध्वपुंड्रः यश्च विष्णुं ध्यायति सः नाकं याति सं न विद्यते
अकं दुःखं यस्मिन् स नाकः स्तं कथं भूतः दरचक्रधारी दरं
शंखः चक्रं च धारयतीति यः किं कृत्वा दुरितं निविधूय ता
कुथित्वा किं यद्वत् एनं नाकं यतयं वीतरागा यतयः विशंति
प्रविशंति नाकं वैकुंठमित्यर्थः शाखांतरे यजुर्वेदे अश्व
क्रांते रथक्रांते विष्णुक्रांते वसुंधरे । शिरसा धारयिष्या

मित्रैरक्षस्व मां पदे पदे इति मृत्प्रार्थना। मृत्तिके हन मे पापं यन्मया दुष्कृ-
तं कृतं मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमंत्रिता मृत्तिके देहि
मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद
मृत्तिके त्वया हतेन पापेन गच्छामि परमां गतिं इति मृदभिमंत्र-
णं याज्ञवल्क्योपनिषदि हरेः पदाकृतिमात्मनो निधाय म-
ध्ये स्थिते ऊर्ध्वपुंड्रं यो धारयति स परस्य प्रियो भवति स पुण्य-
वान्भवतीति कठवल्ल्यां महोपनिषदि धृतोर्ध्वपुंड्रोदर- ५५
चक्रधारी इत्यादि स्तम्भगालोपनिषदि ऊर्ध्वपुंड्रमिति आचम्य
धारयेत्पुंड्रं मध्ये शून्यं तु ऊर्ध्ववत् तस्य प्रमाणमाह नासिका

मूलमारभ्य केशान्तं सुप्रकल्पयेत् अंगुलस्तस्य तिलकं च यथाविधि
व्यास जाह्नवीतीरसंभूता मृदं मूर्ध्नि बिभर्ति यः बिभर्ति रू-
पं सोऽर्कस्य तमोनाशाय केवलं सत्यकामः गोमतीतीरसंभूतां गो-
पीवापीसमुद्भवं मृदं मूर्ध्नि वहेद्यस्तु सर्वपापैः प्रमुच्यते
यागो दानं तपो होमः स्वाध्यायः पितृतर्पणं भस्मीभवति तस्य
ऊर्ध्वपुंड्रं विना कृतं अशुचिर्वाप्यनाचारो मनसा पाप-
माचरेत् शुचिरेव भवेन्नित्यं मूर्ध्नि पुंड्रांकितो नरः नापाङ्-
कृष्णेनादर्शेन जले चावलोकयेत् न प्रावृतशिराः कुर्यात्ति-
लकं कर्मसाधनं अंगुष्ठः पुष्टिदः प्रोक्तो यशस्यामध्य-

माभवेत् अनामिकास्त्रियं दद्यान्मुक्तिं दद्यात्प्रदेशिनी श्रीभगवा
नुवाच ललाटे केशवं विद्यान्नारायणमथोदरे माधवं हृद
ये न्यस्य गोविंदं कंठकूपके विष्णुं च दक्षिणे कुक्षौ तद्भुजे म
धुसूदनं त्रिविक्रमं कर्णमूले वामकुक्षौ तु वामनं श्रीधरं
च हृषीकेशं वामयोर्बाहुकर्णयोः पद्मनाभं पृष्ठदेशे ककु
द्दामोदरं स्मरेत् वासुदेवं स्मरेन्मूर्ध्नि तिलकं कारयेत्सदा इति चार
दीपे तिलकविधिरुक्तोऽदः गरुडपुराणे अस्नातोऽयं क्रि ५०
यां कुर्याद्दक्षिः पापसंयुतः गोपीचंदनसंपर्कस्ततो भवति
तत्क्षणात् अन्यत्रापि स्नात्वा चोर्ध्वपुंड्रं सदा कुर्याद्धोमं स्व चाउ

भस्मना तु भयवंदनेनैव वर्तुलं नृकृतात्परा ऊर्ध्वपुंड्रं द्विजातीनां क्ष
त्रियस्यार्धचंद्रकं वैश्यस्य वर्तुलं प्रोक्तं शूद्रस्याथ त्रिपुंड्रकं मृत्ति
काचंदनं भस्म तथा तोयं चतुर्थकं एभिर्द्रव्यैर्यथाकालं तिल
कं तु समाचरेत् ऊर्ध्वपुंड्रं विप्राणां यच्छ्राद्धं नोऽजये द्विजः।
पितरस्तस्य हृष्टास्सम्मोदंते सुचिरं दिवि इत्यादिना प्रसं
गेन तिलकविधिरुक्तः तत्र तत्र स्वस्वविषयो ज्ञातव्यः ऊर्ध्व
पुंड्रनिषेधः स तु शैवानामेव न वैष्णवानां यत्र त्रिपुंड्रनि
षेधः स तु वैष्णवानामेव न शैवानां अत्र पुंड्रशब्देन पर्वमु
क्तं भवतीति स्वसंप्रदायानुसारेण वर्तितव्यमिति भावः

न ह्रि निंदा निंदितं प्रावृत्ता अपि तद्विधेयं स्तोत्र मितिन्याया
त् द्वषोमस्तु निंदा कृत प्रत्यवायात् प्रकृत मनुसरति मुमुक्षु
निर्वीतरागैर प्रमत्तैः समाहितैः ऊर्ध्वपुंड्रं हरेः पूजा च त्रि
याद्यैरनुष्ठितं तत्र विशेषः ब्राह्मणेनैव मृद्धार्य्येनतन्समा
चवंदनं यद्यबुध्याद्विनयात् प्रायश्चित्ति भवेत्तु सः न
त्रिपुंड्रं द्विजैर्धार्यं पट्टिकाकारमेव च न चान्यदेवतालि ५१
शपाद्यपि कदाचन यस्तु नारायणादन्यं स्वतंत्रेण प्रपू
जयेत् भवेयुर्निष्फलास्तस्य यज्ञदानादिसत्क्रियाः अं
गत्वावेन देवानामर्चनं न निषिध्यते स्वतंत्र्य बुध्याय:

ऽर्च्यो ब्राह्मणो नरकं ब्रजेत् तस्मात्तु ब्राह्मणो नित्यं प्रयत्नेनार्च
येद्धरिं तदावरणभेदेन देवताः परितोर्चयेत् अवैष्णवस्तु यो
विप्रः श्वंडालादधमः स्मृतः तेन सह वक्तव्यमापद्यपि कदा
चन सुदर्शनोर्ध्वपुंड्राणां धारणं प्रथमं स्मृतं तन्मात्राध्यय
नं चैव तदाराधनं तथा तत्रैव अन्यत्रापि नित्यमाराधनं वि
ष्णोर्ध्यानं होमो जपस्तथा तत्कथा श्रवणं चैव तन्नामस्क
प्रकीर्त्तनं तत्पाद●नार्थसेवा च तन्निवेदितभोजनं प्रणाम
स्तस्य भक्तानर्त्तनं गीतवादनं तत्स्तोत्रपाठनं चैव तदन्यामा
मसेवनं एवं स्वधर्मजं नित्यं नारायणमानमयं सवै

रुचो नवच्छिद्रः सर्वलोकेषु पूजितः ॥ ललाटे चार्द्धं ऊर्द्ध्वं बाहु
मूले सुदर्शनं ॥ कंठे पद्मं हृन्मासान्ते पांचजन्यं दक्षिणे करे वेत्र
वनसंप्राप्ताया हरिसंबंधवेष्टनात् ॥ इति तिलकप्रशंसा वेद
तप्रसंसा चोक्ता ॥ इदानीं शंखचक्रे तुलसीधारणनामसं
कीर्तनपूर्वकं गोपीचंदनतिलकप्रशंसोतेमेवाह काशीखंडे
हरिनामकरमुखं तालं गोपीमृद्धिंदं किंतं उरसि मालिनोर
स्कंस्पृशेमुनयोमोक्षटाः ॥ शंखचक्रांकिततनु शिरसा मंज
रीधरः गोपीचंदनलिप्तांगो दृष्टश्चेत्तदघं कुतः ॥ अन्यत्र का ५२
शीखंडे ॥ अंतकः ॥ शिक्षयत्येवं निजदूतान्मुहुर्मुहुः तेसा

ज्याथे कारस्वत्थानामां पि परिस्थियते श्रीखंडे कसत्रामोदः स्वर्णे
वर्णः कृत्तादृशः ॥ तत्सादिस्त्यं कवेती र्थेयज्ञोपाचंदने यथा ॥ इ
तस्मृणुत यज्ञाल्लं गोपीचंदनलांछितं कुलदंगारवस्तोपि इ
रत्याज्यः प्रयत्नतः ॥ पूर्वं गोपीचंदनलिप्तांगो दृष्टश्चेत्तदघं
कुतः ॥ इति गोपीचंदनमाहात्म्यं काशीखंडे ॥ अथ तदथर्वण
वेदे वासुदेवोपनिषद्विस्तरेणाच्यते ॥ ॐ नमस्कृत्य भ
गवन्नारदः सर्वेश्वरं वासुदेवं पप्रच्छ श्रीभगवन्पूर्ध्व पुं
ड्रविधिं द्रव्यमंत्रस्थानादिसहितं मे ब्रूहीति तं होवाच भगवान्वा
सुदेवो वैकुंठस्थानोद्भवं मम प्रीतिकरं मद्भक्तैर्ब्रह्मादि

भिर्धार्यते॥ विष्णुचंदनं वैष्णवस्थानादाहृत्य सद्वारकायां मया प्रति
ष्ठितं चंदनं कुंकुमादिसहितं विष्णुचंदनं ममांगे प्रतिदिन
म् लिप्तं गोपीभिः॥ प्रक्षालनाद्गोपीचंदनमाख्यातं मदंगले
पनं पुण्यं चक्रतीर्थांतस्थितं चक्रसमायुक्तं पीतवर्णं मुक्ति
साधनं भवति॥ अथ गोपीचंदनं नमस्कृत्य॥ गोपीचंदनं
नमस्कृत्य॥ पापघ्न विष्णुदेहसमुद्भव चक्रांकित नमस्तुभ्यं धा
रणान्मुक्तिदो भव॥ धारणाविधिमाह॥ इमं मे गंगे यमुने स
रस्वति शुतुद्रि स्तोमं सचता परुष्ण्या॥ असिक्न्या मरुद्वृधे वि
तस्तयार्जीकीये शृणुह्या सुषोमया॥ इति जलमादाय विष्णो ४२

र्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि यो अस्कभायदुत्तरं स
धस्थं विचक्रमेत्रेधा निदधे पदं समूढमस्य पांसुरे त्रीणि पदा विचक्रमे
विष्णुर्गोपा अदाभ्यः अतो धर्माणि धारयन्॥ विष्णोः कर्माणि पश्यत यतो
व्रतानि पस्पशे इंद्रस्य युज्यः सखा॥ तद्विष्णोः परमं पदं सदा पश्यंति सूर
यः॥ दिवीव चक्षुराततं॥ तद्विप्रासो विपन्यवो जागृवांसः समिंध
ते॥ विष्णोर्यत्परमं पदं॥ इत्येताभिर्ऋग्भिर्विष्णुगायत्र्या च त्रिवारमभि
मंत्र्य॥ तथा च विष्णुगायत्री॥ नारायणाय विद्महे वासुदेवाय धी
महि तन्नो विष्णुः प्रचोदयात्॥ शंखचक्रगदापाणे द्वारकानिल
याच्युत॥ गोविंद पुंडरीकाक्ष रक्ष मां शरणागतमिति मां ध्याय

गृहस्थो ललाटादिद्वादशस्थाने अनामिकयांगुल्या विष्णुगायत्र्या
केशवादिद्वादशनामभिर्वा धारयेत् ब्रह्मचारी वानप्रस्थो ललाटहृ
त्कण्ठबाहुमूलेषु वैष्णवगायत्र्या कृष्णादिपंचनामभिर्वा धा
रयेत् ब्रह्मादयस्त्रयो मूर्तयस्तिस्रो व्याहृतयस्त्रीणि छंदांसि त्रयो
वेदाः त्रयः स्वराः त्रयोग्नयो ज्योतींषि त्रीणि कालास्त्रयः तिस्रो
वस्थाः त्रयः आत्मानः पुंड्रास्त्रय ऊर्ध्वा अकार उकार मकार एते
सर्वे प्रणवमया ऊर्ध्वपुंड्रात्मकास्तत्पदं तदोमित्येकधा समर्चव
तु परमहंसो ललाटे प्रणवेनैकमूर्ध्वपुंड्रं धारयेत् तत्र
दीपप्रकाशं स्वमात्मानं पश्यन् ब्रह्मैवाहमस्मीति भावयन्

योगी मत्सायुज्यमवाप्नोतीति २ अथान्योर्ध्वपुंड्रमध्ये वा हृ
दयकमलमध्ये वा स्वात्मानं भावयेत् तस्य मध्ये वह्निशिखा अणी
यार्ध्वा व्यवस्थिता: पूर्वमन्यस्य पुंड्रस्थं कृत्वा पदेन ततो ध्यायेत् क्रमा
देवं स्वमात्मानं भावयेन्मां परं हरिं एकाग्रमनसा योगी मां ध्यायेद्ध
रिमव्ययं एको विष्णुरनेकेषु जंगमस्थावरेषु च अनुस्यूतो वस
त्यात्मा भूतेष्वहमवस्थितः तैलं तिलेषु काष्ठेषु वह्निः क्षीरे
घृतं यथा गंधः पुष्पेषु भूतेषु तथात्मावस्थितो ह्यहं यच्च किंचि
द्दृश्यते श्रूयतेपि वा अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थि
तः देहादिरहितं सूक्ष्मं चित्प्रकाशं निरंजनं सर्वानुस्यूत

स्मृतमद्वैतं परं ब्रह्म भवाम्परं ब्रह्मरंध्रे भ्रुवोर्मध्ये हृदये चिन्हविं हरिं
गोपीचंदनमालिप्य तत्र ध्यात्वाप्नुयात्परं ऊर्द्ध्वदंडमूर्द्ध्वरेताश्च
तूर्द्ध्वपुंड्रोर्द्ध्वयोगवित् सऊर्द्ध्वपदमाप्नोति यतिरूर्द्ध्वचतुष्क
वान् इत्येतन्निश्चितं ज्ञानं मद्भक्त्या सिध्यति स्वयं नित्यमेकाग्र
भक्तिस्तु गोपीचंदनधारणात् ब्राह्मणानां तु सर्वेषां वैदिका
नाममुत्तमं गोपीचंदनवारिणा मूर्द्ध्वपुंड्रो विधीयते गोपी
चंदनाभावे तु तुलसीतीर्थमृत्तिका मुमुक्षुर्धारयेन्नित्य ५५
मपरोक्षात्मसिद्धये गोपीचंदनलिप्तस्य देहस्थानि च तस्य
मेव आस्थीनि चक्ररूपाणि भवंत्येव दिने दिने ३ एवं वि

धीना गोपीचंदनं यो धारयेद्यस्तु तदधीते वा स सर्वमहापातकेभ्यः पू
तो भवति पापबुद्धिस्तस्य न जायते सर्वतीर्थेषु स्नातो भवति सर्व
यज्ञैर्याजी भवति सर्वैर्देवैः पूज्यो भवति नारायणे मय्येकांतभक्तिश्च
वर्द्धते सम्यक्ज्ञानं लब्ध्वा सायुज्यमवाप्नोति न च पुनरावर्त्तते तद्वि
ष्णोः परमं पदं सदा पश्यंति सूरयः दिवीव चक्षुराततं तद्विप्रासो वि
पन्यवो जागृवांसः समिंधते विष्णोर्यत्परमं पदमिति इति वासु
देवोपनिषत् स्मृत्यर्थसारे च गोपीचंदनखंडं तु यो ददाति द्विजा
तये कुलं तु तारितं तेन भवेदेकोत्तरं शतमिति गोपीचंदनोर्द्ध्व
पुंड्रतिलकप्रशंसा पूर्वं वासुदेवोपनिषदि गोपीचंदन

लिंगस्य देहस्थानि च तस्यैव । अस्थीनि चक्ररूपाणि भवंत्येव दिने दिने
इत्युक्तं । अतस्तस्य गोपीचंदनस्य माहात्म्यं अथर्ववणवेदे गोपीचंदनो
पनिषत्स्वाख्यातं तत्रोक्तं । अथैनं बाष्कलः पोमोहाल्लंच योगोपीमनसा
वचसा पिवा वादेन वा सदा पापीयं गतिमाप्नोत्यसशीं गोपीका
नाम संरक्षणी कृतः संरक्षणी नरकान्मृत्योर्नूर्वा वाच्चु संरक्षणे
चंदनं तु धिकारणं किं तामधृष्टिकारणं य एवं विद्वान् एतदा
ख्यापयेत् य एतदुधारयेत् गोपीचंदनमृत्तिकाया निरुक्तं च ।
स ब्रह्मलोके महीयते स ब्रह्मलोके महीयत इत्युपनिषत् गोप्यो ना ५६
म विष्णुस्यः तासां चंदनमाह्लादनं श्वाह्लादस्य ब्रह्मानंदस्य
क

कास्च विष्णुपत्न्यो गोप्यो नाम जगत्त स्त्रष्टिस्थित्यंतकारिण्यः प्र
कृतिमहदाद्या महामायाः कश्च विष्णुः परं ब्रह्मैव विष्णुः कस्त्री
ह्लादो विहितस्वकर्मानुष्ठानेन पापसंहरणात् शुद्धांतःकरणा
नां ब्रह्मप्राप्तिश्चस्व वेदेत्युपनिषत् ॥ २ ॥ गोपीत्यक्षरं च्युतां चंदनं
उततः पश्चात् गोपीत्यक्षरद्वयं चंदनं तु अक्षरपंचकं य एवं वि
द्वान् गोपीचंदनं धारयेत् पश्चादक्षरं परमाप्नोति पंचत्वं सनप
श्यति ततोऽमृतत्वमश्नुते ततोऽमृतमश्नुत इत्युपनिषत् ॥ ३ ॥
अथ मायाशबलितं ब्रह्मासीत् ततश्च महदाद्या ब्राह्मणो माया
संश्लेषनात् पंचभूतेभ्यो गंधवतीयं पृथिव्यासीत् । अस्याः

पृथिव्याश्चैवं वावर्णे ने[illegible] पीतवर्णाः मृत्तो जायंते मायामनु
ष्यरूपत्वाद्धि सुमेधा माया च गोपिकानुग्रहार्थं संसारस्थि
त्यर्थं च माजाज्ञा वर्षितव्रजसंबंधवशादस्य चंदनस्य वै
तत्वं यस्य वं विद्वान् कस्तोद्द्यात् अनुपप्लवः सर्वमायुर
ति ततः प्रज्ञापत्यमश्नुते रायस्पोषं गोपत्यं यएतन्मंत्रं ९
प्रातर्निशि ध्यायन्नहोरात्रकृतं पापं नाशयति तं तु
माह भक्त इत्युपनिषत् इत्यथर्वरहस्ये गोपीचंदनोप ५७
निषत् समाप्त गारुडपुराणे च उक्तं सम्मृत्तिकापुं
ड्रं यः करोति दिने दिने तस्यावलोकनात्पापं याति व

शतोष्णवं ऊर्ध्वपुंड्रधरो विप्रो सृष्टै यस्यान्नमश्नुते तदा विशंकु
लं तस्य नरकाडुरं भवेत् एतदर्थं वसिष्ठोप्याह ऊर्ध्वपुंड्र
विहीनस्तु यस्तु संध्यादिकं चरेत् तत्सर्वं राक्षसा यांति नरकं
चाधिगच्छति दत्त्वा वाच मार्जनानंतरं प्रातरूर्ध्वपुंड्रं विनिर्दि
ष्टात् समध्याह्नि तिलकं चापोपश्चादर्घ्यं समाचरेत् उशनाः
ऊर्ध्वपुंड्रं मृदा कुर्यात् तिर्यक्पुंड्रं च भस्मना अर्घ्यदानात्प
रं प्रातरूर्ध्वं मध्याह्ने वक्ष्ये ऊर्ध्वपुंड्रं मृदा कुर्यात् तिर्यक्पुंड्रं
च भस्मना इति पद्यद्वयेन इदमुक्तं भवति वैष्णवैस्तु मृदा
ऊर्ध्वपुंड्रं इति तिलकं कार्यं तिर्यक्पुंड्रं स्तु भस्मना

शिवोपासकैः कार्यं इति स्वस्वसंप्रदायानुसारेण उपासनानुसारे
ण वर्त्तितव्यं तदुक्तं शिवो भूत्वा शिवं यजेदिति वचनात् तथा च
नृर्यत्तस्म परंब्रह्मद्वयं मुक्तेश्च कारणं तेयोरेकतरं सेव्यं संसार
तयत्नीरुचिः इति बहुधा तस्य माहात्म्यं तत्र तत्र स्मृतसंहितादि
ग्रंथेषु उक्तं द्रष्टव्यं गोपीचंदनमाहात्म्यं तु काशीखंडादि बहु
ग्रंथोक्तमस्मिन् ग्रंथे लिखितं द्रष्टव्यं अथवा ऊर्ध्वपुंड्रस्य
परिविस्तृतिधार्यमिति समुच्चयः शास्त्रे दृष्टः तथाप्यत्र यो ५८
ग परिज्ञाते गोपीचंदनस्य ऊर्ध्वत्रिपुंड्रं तस्मात्तिर्यग्धार्यं हरि
हरेर्योगी सर्वकर्मसु पावनमिति स्वच्छतस्तोकः शंख

श्री

चक्रादिचिह्नांगासु लसाटोर्ध्वपुंड्रकः रामनाममहरमुखस्तिमुक्तो ज्ञाना
त्र संशयः इति श्रीरामनाममाहात्म्यमुत्तात्रमन्त्रं धितश्रुतिस्मृति
पुराणोपचमंप्रक पूर्वप्रकरणे गोपीचंदनमहिमा गोपीचंदनतिल
कमहिमा वैष्णवमहिमा तुलसीमहिमा च वर्णितः इदानीं पुनः पद्मपु
राणे वैष्णवमा निरूप्यते तत्र ब्रह्मोवाच अष्टादशपुराणेषु पाद्मं
वैष्णवमुच्यते तस्मिन्नाद्ये वैष्णवानां लक्षणं वक्ष्ये शृणु वैष्णव
विष्णुशास्त्रोक्तं प्रवृत्ता मनसा गिरा ते वैष्णवाः सदा ज्ञेया नान्ये ज्ञेयाः
कदाचन शंखचक्रांगदांचैव तथा पद्मं निरंतरं द्विजा ये धारय
न्तिते वै वैष्णवसत्तमाः कुलं धन्यतमं तेषां यत्र जाना हि

९

वैष्णवाः तेवैष्णवे ॥ किं किं न भवत्येव दृश्यमाने हि वैष्णवे तस्मात्का
रणाद्दृश्य पूजनीया वैष्णवाः ॥ केचित्कुर्वंति वैष्णवस्य किंचिन्नि
दां प्रकुर्वते तथापि नश्यंति कुर्वाणा यांति विष्णोः परं पदं त
स्मिन्कलियुगे घोरे पापावर्तशताकुले वैष्णवा नैव दृश्यंते दृ
श्यंते यदा त्विकाजनाः सात्विकाः सत्वसंपन्ना विष्णुभक्तिपरायणाः
तेषां दास्ययोगेन ते प्रयांति परां गतिं ॥ भगवद्भक्तिहीनानां सं ५९
स्तारेष्वनुवर्तिनां कदाचिद्भक्तसंसर्गो दृश्यते मोक्षदः ॥ भवत्येव
भ वसेवस्तसंहिनागांरः दः वैष्णवो यस्य देहे तु यत्र तिष्ठति वै
ष्णवः तत्र गंगा तीर्थरूपं हि न दृष्टाः पावनाः सदा ॥ पत्रपुष्पफ

लं चान्नं वैष्णवेभ्यो हि यच्छति तदनंतफलं ज्ञेयं किं पुनः श्रद्धया
कृतं ॥ पादसंवाहनं कार्यं अर्चनं वंदनादिकं भोजनं भुक्तशेषं च
संग्राह्यं वै प्रयत्नतः ॥ तैः सर्वैर्लभते नात्र पूजितो येन वैष्णवः
प्रयागे गंगया युक्तो गर्जते माघमासकः ॥ वर्षांतो गर्जते मेघ
स्तथा गर्जंति वैष्णवः ॥ आद्यजाति समारभ्य श्वपचांतं तथैव
च ॥ यत्र ये विष्णुभक्ताश्च विश्वं पावित्रयंति ते ॥ कार्तिकमाहा
त्म्ये ब्रह्मनारदसंवादे ॥ सर्वधर्मान्परित्यज्य दृष्टाः सत्रादिका
नियतं ॥ कार्तिके परया भक्त्या वैष्णवैः सह संगमाः चरणाय
बिंदुपदं ऊंडी वित्तं प्राप्य पंचजं विषद्विषया प्राप्य वैष्णवेनाचि

तो नरः दुर्जनं वैष्णवं शास्त्रं वैष्णवैः सह सत्कथा न तत्करोति वि
प्रेंद्र पूंसांस्तान् । त्रिमार्गगा । यत्करोमि महापुण्यं वैष्णवैः स
हसंगमः । वैष्णवानां त्रिलोकानामामहामुने दीनां पक्षप
णानां च यथाश्रममुपेयुषां तीर्थयात्रापराणां च यादृशाति
च कार्त्तिके कालेवाय दिवाकाले लक्षकोटिगुणं तु वेत्
यत्र विष्णुकथा नित्यं यत्र तिष्ठंति वैष्णवाः कलिबाह्या
नरास्ते वै ये र्चयंति सदा हरिं । अथैतादृशां वैष्णवानां ति ६०
थिनिर्णयामृते धर्मोत्तरमुच्यते तत्र तावदुपवासस्वरू
पमाह तदुक्तं विष्णुधर्मोत्तरे । उपावृत्तस्य पापेभ्यो यस्तु वा

सो गुणैः सह । उपवासः स विज्ञेयः सर्वभोगविवर्जितः इति । अत्र
पापेभ्यो निवृत्तस्य फलाभिसंधिकानि तानि पापानीत्यत्र सुमंतुराह
विहितस्याननुष्ठानमिंद्रियाणामनिग्रह निषिद्धसेवनं चैतत्सर्वं
वर्जनीयं प्रयत्नतः इति । हारीतोऽपि पतितपाषंडिनास्तिकादि
संभाषणमनृतं स्त्रीविवादादिकमुपवासदिने वर्जयेदिति
नोचेत्तत्र विष्णुपुराणे प्रायश्चित्तमुक्तं स्पर्शने च नरः स्नात्वा
शुचिरादित्यदर्शनात् संभाष्य तान् शुचिषदं चिंतयेदच्युतं
बुधः तेषामालोकनात्सूर्यं पश्येत मतिमान्नर इति । शुचिष
दं शुचिषदं विष्णुधर्मोत्तरेऽपि असंभाष्या सामाभाष्यतुल्य

स्पं त्वस्य तुलसीदलं आमलक्याफलं वापि पारणे प्राश्य शुद्ध्य
तीति गुणैः सह वास इति चोक्तं तत्र गुणाश्च विष्णुधर्मोत्तरे उ
क्तं तद्रूपजपनं ध्यानं तत्कथाश्रवणादिकं तदर्चनं च तन्नाम
कीर्त्तनं श्रावणादयः उपवासकृतायेते गुणाः प्रोक्ता मनी
षिभिरिति तच्छब्देनात्र प्रक्रान्तत्वाद्विष्णुरेवाभिधीयते उप
वासव्रती दन्तधावनं हिंसामनृतं चौर्यमसत्कं जलपान
मकृतां बुधसत्त्वलां स्त्रीसंयोगं दिवास्वापं कांस्यं मांसं च
वर्जयेत् एतेष्वेषु प्रायश्चित्तं स्मृतिसंग्रहे प्रोक्तं स्तेनः संकर्याः ६१
सर्वं कृत्वा स्तेनं च हिंसनं प्रायश्चित्तं स्मृतिसंग्रहे प्रोक्तं

ष्टा

व्रती कुर्याज्जपेन्नामशतत्रयमिति नाम विष्णोर्नामेत्यर्थः मि
थ्यादिदिवास्वापात्यन्तकृज्जलपानैः प्रायश्चित्तं कात्यायनेनोक्तं
मिथ्यावादे दिवास्वापे बहुशोंबुनिषेवणे अष्टाक्षरं व्रती जप्त्वा
स्नातमष्टोत्तरं शुचिः अष्टाक्षरं नमो नारायणायेति यावत्
इत्यादिस्मृतिषु श्रीमद्भगवन्नामसंकीर्त्तनं सर्वेषां सर्वपापेषु
प्रायश्चित्तमुक्तमित्यर्थः अथ शंखचक्रधारणविधिरुच्यते
शंखचक्रांकनं कुर्याद्दात्मानो बाहुमूलयोः कलत्रापत्यभृत्ये
षु पश्चादि पूर्वमुक्ये सम्बन्धपत्रदाराणां ब्राह्मणानां वि
शेषतः कुर्याद्वैष्णवानां च वैष्णवानां दक्षिणे शंखचक्रे

स्फटं कुर्यात् अतप्ते बाहुमूलयोः । सर्वाश्रमेषु वसतां स्त्रीणां च श्रु
तिनोदनात्तहो भाग्निनैव संतप्तं चक्रमादाय वैष्णवः । दक्षिणं
बाहुमूलं च दग्ध्वा कर्म समाचरेत् । अत्र श्रुतिस्वशाखांतरे च
क्रमादायाग्नौ तप्तं प्रतिब्राह्मणस्याथ दक्षिणे बाहौ धारयेच्चक्र
मुपविशन्तियं पांचजन्यं आदायाग्नौ तप्तं प्रतिब्राह्मणस्यात्र
वामबाहौ धारयेत् । ब्रह्मवादिनो वदंतीति । विधिना धारयेद्वैवं प
वित्रं पवित्रं चक्रमुत्तमं ततः स्तवेष्ठ वं याति नान्यथा द्वि ६२
त जसत्तमाः । स्मात्तु विधिवच्चक्रं धारयित्वा सुदर्शनं । पश्चा
सर्वाणि कर्माणि कुर्वीत द्विजसत्तमाः । महोपनिषदि ब्र

नसूक्ते । दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनं । सव्ये तु शंखं
बिभृयादिति वेदविदो विदुरिति । चक्रस्य धारणे कालं ब्राह्म
णानां विदुर्बुधाः । जातकर्माणि चैव कुर्याच्चौलोपनयनेपि वा
मंत्राध्ययनकाले वा चक्रं धार्यं विधानतः । यमस्मृतौ उपवीत
शिखाबंधश्चक्रलांछनसंयुतः । चक्रलांछनहीनस्तु स विप्रो
निःफलो भवेत् । व्यासस्मृतौ ललाटे तु गदा धार्या मूर्ध्नि चापं
शरं शंस्तथा हृन्मध्ये नंदकं चैव शंखचक्रे भुजद्वये हरि
वंशो । चक्रांकिताः प्रवेष्टव्या यावदागमनं मम । नामुद्रिताः
प्रवेष्टव्या यावद्वै गमनं मम ऋक्परिशिष्टे यो रुवै सुश्लो

कर्मोत्थे धर्मानुतिष्ठमानोग्निना चक्रं यत्नेग्निर्वै सहस्रारः सहस्रा
रो नेमिनाभस्तत्तनूर्ब्राह्मणः सायुज्यं सलोकतामाप्नोति इति य
जुः परिशिष्टे चक्रं बिभर्त्ति वह्निना निर्मितं बलं देवानाममति
तस्य विष्णोः सप्ततिनाकंडरिता विधूय विशंतियद्वनया
वीतरागाद् इति प्रतिविष्णोरत्न चक्रेसुतप्तेऽप्याघ्याच्छादोग
परिशिष्टे स्मृतयश्च अग्निनैवतप्तं तप्तं चक्रमादायवैष्ण
वं दारयेत्सर्ववर्णानां हरिसौजोक्य सिद्धये ब्रह्मांडे तु ६३
वाधस्तु भयं मुक्तापयिवात्स्वकांतनुं चक्रादिविन्हि
तां न्नूपधारयेद्वैष्णवोनरः नारदपंचरात्रे द्वादशारेतु ष

ट्कोणं वलयत्रयसंयुतं हरेः सुदर्शनं तप्तं धारयेत्तु द्विजोत्तमः महा
भारते ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः सचक्रलक्षणैः अर्चनीयं स
मेष्यश्च नित्ययुक्तैः स्वकर्मभिः स्कंदपुराणे इत्थं द्विजेंद्र निजक
र्मगणान् सदैव संशिक्षयेत्स्ववनिगान् सहि धर्मराजः अन्येपिये
हरिलक्ष्मांकधराधरायां ते द्रुतः तु नरहो परिवर्जनीयाः ब्रह्मां
डे संवत्सरेण यत्पापं मनसा कर्मणा कृतं तत्सर्वं नश्यते तेषां
शंखचक्रांकदर्शनात् पद्मपुराणे हरपादहस्तयं चैवत्र अग्निवो
रंजयं तथा सर्वं तत्र गामं याति तत्सचक्रांकधारणात् वाराह
म्लेच्छदेशो भवेन्नेवापि चक्रांको यत्र तिष्ठति योजनानि तथा

त्रिणीस्तावद्धातावसुंधरा ॥ मत्स्यपुराणे ॥ विष्णुचक्रांकितंदेहंपवि
त्रमितिवैश्रुतिः ॥ चक्रांकितायदातव्यंकव्यंहव्यंद्विजोत्तमैः ॥ नारद
यपुराणे ॥ चक्रांकितस्यसांनिध्येयत्कर्मकुरुतेनरः ॥ स्नानंदानं
तपोहोमस्तत्सर्वंचाक्षयंभवेत् ॥ भविष्योत्तरेच ॥ मच्चक्रांकित
देहोपिमद्भक्तोस्तुविचक्षणः ॥ नचाप्नोतिवशंमृत्योरन्यथाज
न्मभावान्नरः ॥ मार्कंडेयपुराणे ॥ चक्रादिधारणंपुण्यंविष्णुमं
प्र त्रविवर्धनात् ॥ तिलकंतस्यजंतोर्हिश्रद्धयाचास्यकारणं ॥ वामन ६४
पुराणेच ॥ शालग्रामशिलायांवाबाहुमूलेसुदर्शनं ॥ कुलको
टिसमुद्धृत्यसगच्छेद्वैष्णवंपदं ॥ अथर्वणे ॥ एतद्वैयमुरुक्रम

स्य ॥ चिह्नैरंकितालोकेसुभगाभवामः ॥ तद्विष्णोःपरमंपदंतु
गच्छंतीरुक्मांछिताः ॥ ब्रह्मवैवर्तके ॥ चक्रांकितंतुजंयत्रयोवै
निंदतिमूढधीः ॥ सयातिनरकंघोरंयावदाभूतसंप्लवं ॥ चक्रां
कितंनरंदृष्ट्वायस्तुतंनाभिवंदयेत् ॥ तीर्थान्यपिनिवृत्तंप्रा
प्यविष्ठायांजायतेकृमिः ॥ येकेचिदत्रपुरुषाविष्णुच
क्रेणमुद्रिताः ॥ तेषांदर्शनमात्रेणमहापातकनाशनं ॥ स्कं
दपुराणे ॥ चतुर्वेदाधिकोयस्तुशंखचक्रादिचिह्नतः ॥ गृ
हेयस्यगृहस्थस्यतस्यकिंकुरुतेयमः ॥ किंकरिष्यसिमत्पा
तुप्रयागमरणेनवा ॥ चक्रांकितशरीरस्यगृहेमुक्तिःप्र

कीर्त्तिताः । दृष्ट्वा चक्रांकितं देहं मरणे समुपस्थिते यमदूताः पला
यंते आगच्छति हरेर्गणाः । इच्छायुद्धांकितं देहं चेद्यत्र त
त्र वैश्रवणानमपि तत्र गच्छ किं पुनः क्षुद्रमयः । अत्राख्या
यिका सुदर्शनो नाम राजा सर्वत्र अपराजितः । कृतराज्यं द
ण बासो नारदराजसुखं सह । राजोवाच ब्रूहि विप्र जयो मंत्र
मो दशास्यस्य देवकृतं । नारद उवाच । वक्ष्यामि वृत्रं राजेंद्र स्व
राज्यं च यथा लब्धवान् । वृत्रेण निर्जिताः सर्वे इंद्रा देवाः सवास ६
वाः कृतराज्य बलोद्देस देवाः सर्वे उमेश्वराः । ब्रह्मादयो ग
यः सर्वे शंकरं प्रभुं रुद्रास्तथा । त्राहि त्राहि जगन्नाथ वृत्रे

ण निहिता वयं त्रैलोक्याधिपतिर्जातो वृत्रो निर्जितकंटकः । य
थाबाधेन च अस्माकं तथा कुरु जनार्दन । श्रीभगवानुवाच । ममा
युधे स्वदेहानि सांछयित्वा सुरोत्तमाः । युध्यतां समरे दैत्यैर्मत्प्र
सादेन देवताः । ममायुधांकितो देहे नैव । तांस्तु स्थास्यंति वः स्वयं
या स्यंति समरे मत्प्रसादेन लीलया । एवमुक्ते प्रणेमुस्ते ब्र
ह्मरुद्रपुरोगमाः हत्वा वृत्रं गता देवाः स्वस्थानं समुदान्विताः
। ततः प्रभृति ब्रह्माद्याः सर्वे देवाः सवासवाः । चिह्नं कृत्वा
युधैर्देहे कर्म चक्रुरतंद्रिताः ऋषयः सिद्धगंधर्वाः पाता
लोकपन्नगेश्वराः देहे कुर्वंति चिह्नानि शंखचक्रमया

न्यपि तस्माद्ब्रह्मपि राजेंद्र कृष्णहस्तायुधांकितं । स्वदेहं सर्वसंप्रा
प्तेऽद्भस्त्वंन्न विष्यसि । इति श्रुत्वा न्यास शिष्याः नैमिषारण्यवा
सिनः । मुदा संप्रष्टे ते स्वत चक्रं कृत्वायुधं हरेः । श्रीकृष्णायु
धमारुह्य यः पठेत्परं नरः । द्वादश्यामथवान्यत्र नैवाप्नोति
यमालयं । न भयं विद्यते तस्य त्रैलोक्यस्यापि संक्षये । दारिद्र्यं
नैव चाप्नोति लक्ष्मीर्न च्यवते गृहात् । सप्तजन्मकृतं पापमे
तद्धृत्वा व्यपोहति । ५५

तथा च गारुडपुराणे भगवानोवाच । सुश्रुष विहगेशानस्वा

दारोचवचनं मम । श्रुतिस्मृतिस्वरूपेणाजगतामुपकारकं सर्वधर्मा
धिकारश्च श्रुतीनामेव नोदिताः । शुचित्वं नियतं तस्य यो बिभर्त्या
युधानि मे । अश्वमेधसहस्रस्य वाजपेयायुतस्य च यत्फलं श्रू
यते तस्मान्मदीयायुधधारणात् । पर्वताग्रे नदीतीरे देवताय
तनेषु च । तपसा यत्फलं प्राप्तं मदीयायुधधारणात् । तद्धारण
विधिं वक्ष्ये महापातकनाशनं । चक्रशंखौ समाराध्य गंधपु
ष्पादिभिः शुभैः । अनवद्यं च नैवेद्यं विनिवेद्य च भक्तितः । सुद
र्शन नमस्तेस्तु पांचजन्य नमस्कृते । इति मंत्रं समुच्चार्य नमस्कु
र्यात्पुनः पुनः । ॐ कृयाद्दक्षिणभुजे मूलेन षोडशाकृतीः चे

च पांचजन्यं च तस्मिन्नग्नौ विनिक्षिपेत् ॥ पुनः पूजा प्रकर्तव्या गंध
पुष्पोपहारकैः ॥ मद्भक्तानन्यमनुज्ञाप्य तस्मादात्मप्रणामे सुधीः
अग्निनैव तु संयुक्तं चक्रमादाय सामकं दक्षिणबाहुमूले
तु स्वं देहे गतसाध्वसः ॥ अथवान्येन केनापि वैष्णवेन महा
त्मना ॥ वांछितं बिभृयाच्चक्रं पांचजन्यं तथैव च ॥ उच्चारयित्वा
मं मंत्र हृदये मां विचिंतयेत् ॥ सुदर्शन महाज्वाल कोटिसू
र्यसमप्रभ ॥ अज्ञानांधस्य मे नित्यं विष्णोर्मार्गं प्रदर्शयेति
सुदर्शनमंत्रः ॥ अथ शंखस्य मंत्र उच्यते ॥ तद्यथा ॥ पांचज
न्य निजध्वानध्वस्तपातकसंचय ॥ पाहि मां पापिनं घोरसंसा
ॐ

रार्णवपातिनमिति ॥ इमं मंत्रं समुच्चार्य दक्षिणे भुजे स्वके य
स्तेन प्रकारेण शंखचक्रं च धारयेत् ॥ त्रिषु लोकेषु संदि
ग्धं मद्भक्तमिति गीयते ॥ केवल्यपुराख्यायां वषट्ते विष्णो
र्भक्तिकमादाय स्वस्वदर्प चक्रेण निरूढं परदांभिवाज्ञेयं चातिस
त्कंतरेभिति ॥ श्रीगरुडपुराणे ॥ अस्याधिकारेणं श्रूहि विविधिवस्तुरुष्य
त्रम वदते मम वक्ता वचनान्यो स्ति भुवनत्रये श्रीभगवानु ॥ गु
रुश्चैवं तु विशेषेण सर्ववर्णेषु यं विधिः ॥ आख्याहि सर्वलोक
मम प्रीतिकरः परः ॥ विप्रोवाय दिवादत्तो वेशपक्षस्य तथैव च ॥
अन्ये स्वेतुरजातास्य चक्रांकाकाम वर्द्धनः ॥ अथर्वणे त्रै

ग्निनावैहोता चक्रं पांचजन्यं सुतप्तं द्विजोधारयेत् ॥ आत्मादि
तमाचरेत् ॥ दास्यार्थाय स्वमुखं प्रपद्यते तस्माद्वैष्णो भ
वति न पुनरागमनं सायुज्यं सलोकतामाप्नोति इति उपनिष
त् ॥ चक्रांकिताय दातव्यं हव्यं कव्यं द्विजोत्तमैः ॥ यो ददाति नरः
प्राज्ञः सत्यवेत्पुण्यमुत्तमं ॥ शरीरे यस्य कस्यापि दृश्यते
वै सुदर्शनं तस्मै ऊर्ध्वेतिपदिं न नमस्कारं सुरादयः ॥ तथा च
श्रुतिः चरणं पवित्रमित्यादि घंटौ च ॥ पवित्रं चरणं लोक ६८
लोकद्वारं सुदर्शनं पर्यायवाचकं ह्येतच्चक्रस्य परमात्मने म
चक्रांकितदेहश्च यस्तु द्वेषं समाचरेत् ॥ वदद्वायरूपं किंवि

तु स मे द्वेषी न संशयः चक्रांकितमनादृत्य योन्यस्मै प्रददाति च ह
व्यकव्यं सर्वे याति निश्चयं नात्र संशयः तस्मात्सर्वप्रयत्नेन भ
क्तः क्रिततमाचरेत् ॥ सर्वोपचारैरनिशं तोषितं न संशयः इत्या
दिश्रुतिस्मृतिपुराणवाक्येभ्यो निश्चयं कृत्वा भगवद्भक्तै
स्तु तप्तशंखचक्रादिधारणं परमात्मा श्री विष्णुप्रीतये अवश्य
मेव कर्तव्यं नैवात्र संदेहः कार्यः ॥

देवोसौ यत्र वितत्ते न बाकुना सुदर्शनेन प्रयतः स्वर्गमाप्नो
यन् ये नांकिता मनवो लोके सृष्टिं वितन्वते ब्राह्मणारूं

तीति पाद्मे उपवीतादिवद्धार्यः शंखचक्रादयस्तथा ब्राह्म
णस्य विशेषेण वैष्णवस्य विशेषतः नारदीये श्रीकृष्ण
शास्त्रेश्च विहीनगात्रः श्मशानतुल्यः पुरुषोथ नारी दृष्ट्वान्
तरंन्टपतेसवास्यास्नात्वासमभ्यर्च्यहरिमंगनित्यमिति न शं
चक्रांकितं दृष्ट्वा ये निंदंति नराधमाः अवलोक्य मुखं ते
षामादित्यमवलोकयेत् अग्निपुराणे श्रावणं प्रतिपित्तुर्वा
क्यं शिलाबुद्धिःकृता किंवा प्रतिमायां हरेर्मया किं मयाप
ठिथदृष्टस्य विष्णुभक्तस्य कर्हिचित् तन्मुक्ति तद्देहस्य चेत
स्तानारदः कृताः तेन कर्मविपाकेन क्षेत्रशोको ममेय

धर्मे पं

दृशः प्रकृतमनुसरति अथ च विधिवच्चक्रं यदि कर्म समाचरे
त् निष्फलं जनकं सर्वं भिक्षान्नं द्विजस्य तु इति वसिष्ठस्मृते:
स्कंदोक्तः श्लोकः शंखचक्रादिचिह्नांगा सत्सदोर्ध्वपुंड्रकाः
रामनामसुखास्ते मुक्ता नात्र संशयं· यस्य नास्ति खलु राघवे मतिः सर्व
दोषदहने कृतासनी रामदास निचयनशोभिते सोपि जीवितवृथाल्लु
विलारः·
पूर्वप्रकरणे वशिष्ठेन अन्यैश्च यदुक्तं ब्राह्मणाः वि
ष्णोरंशादुत्पन्नाः क्षत्रियादयस्तु ब्रह्मणोंशाउत्पन्नास्तत्र शंख
चक्रादिधारणं कर्तव्यमित्युक्तं मिदानीं तद्धारणे प्रकारः शो

नकोक्तप्रकारेणादर्शयति येनैकोक्तप्रकारेण तप्तमुद्राधारणं
कर्तव्यं वेदैः सर्वैः संप्रदायानुरोधतः अत्र आपस्तंबशाखा
योक्तिः ॥ पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि
श्री विश्वतः अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तस्तत्समा
सतेत्यादि आश्वलायनशाखायां तपोष्पवित्रं विततं
दिवस्पदे शोचंतो अस्य तंतवो व्यस्थिरन् इति ऋग्वेदे आप
स्तंबशाखायां चरणं पवित्रं विततं पुराणं येन पूतस्त ७०
रति दुष्कृतानि तेन पवित्रेण शुद्धेन पूताः अतिपाप्मानम
रातिं तरेम लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं

महस्वत् अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां द
धातु तथा निघंटुणा स्त्रे पवित्रं चक्रं लोकद्वारं सुदर्शनं पर्या
यवाचकान्येते चक्रस्य परमात्मन इति सहोवाच याज्ञवल्क्यस्त
प्तुनानात्महिताय प्रेम्णा हरिं नजेन सुश्लोकमोजेर्वमो एपग्निना
संतप्तानि संयच्छ इति यजुर्वेदे बह्वृचे बाष्कलसंहितायां म
ते विष्णोः अथुः चक्रे सुतप्तेजन्मा नो धिं ततं वै मन्तु ष्पेषुनू माः
कुलेबाह्वोर्दधत्सन्यप्सुराराणां लिंगान्यंतेतावकान्च पर्यंत
ति यजुर्वेदे उरुक्रमस्य चिह्नैरंकितो लोके उरुगाज्वमे
ति अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ब्राह्मण

स्यतथानित्यंतत्तचक्रांकधारणमितिपृच्छराणे हकत्वांकित्ता यांच
मूलच्छेनः शाङ्गो बिन्नचागोविंदर्पणाच्चायुधानि बिभ्रतं
अपामूर्मि सचमानः समुद्रं तुरीयं धाममहिषो विवक्तीतिवृह
दारण्यके निविष्टिपोणां सुखंतांभिद्यमानं माध्येवाङ्गमदधत्सुदर्श
नं विष्णोरिदं सूरितेजः प्रवर्ततिदिवानक्तं बिन्नयुस्तज्ज्वास
इत्यादि ॥ श्रुतिस्मृतिशतैरुक्तस्तत्प्रकारः प्रतन्यते ॥ वङ्कच प
रिशिष्टे यथा प्रोक्तो यंशौनकादिभिः षोडशोपचारैर्भूजे ७२
नभगवंतमभ्यर्च्यस्रुचो वा तरेपरमेव्योमन व्रान्नो भिन्नः शंवृक
णा इत्येताभ्यां चक्रंशंखं चाभ्यर्च्य वैश्वानरस्य सुमतौ स्याम

त्पडिमुपचरेत पुरुषसूक्तेन षोडशाहुती हुत्वा भगवंतं पुरुषसू
क्तेन स्तुत्वा पापसुत्यै यो ब्राह्मणमिति दंडवत्प्रणम्येति पूतत
प्तद्वादशारं ज्वलितं ज्वालायवविवर्तिचक्रं परिद्याम्ततस्य अग्नेर्मध्ये प्र
धमेस्य त्येताभ्यां मंत्राभ्यां शंखचक्रे अभ्यावाद्यात ॥ सुदर्श
नमंत्रो यथा ॥ सुदर्शनमहाज्वाला सूर्यकोटिसमप्रभ अज्ञा
नांधस्य मे नित्यं विष्णुमार्गं प्रदर्शय ॥ अथ सुदर्शन गायत्री सु
दर्शनाय विद्महे महाज्वालाय धीमहि तन्नश्चक्रं प्रचोदयात
इति चक्राध्यानं पांचजन्याय विद्महे पवमानाय धीमहि तन्नः
शंखः प्रचोदयात ॥ इति शंखाध्यानं तस्य धारणस्य फलमा

दृ तदुक्तं विष्णुधर्मोत्तरे शंखचक्रांकितो विप्रः श्मशाने म्रियते य
दि प्रयागे या गतिर्यस्य सा गतिस्तस्य नारदेति एवं यः कुरुते
विद्वान् ब्राह्मणः श्रोत्रियः शुचिः सर्वपापैः प्रमुच्येत ब्रह्म
लोकं स गच्छति शयाम्यांश्चैव नोधिन्यां चक्रतीर्थे तथैव च शं
खचक्रविधानेन वञ्चितो न वै नरः इति नामप्रसंगेन मुधार
णादि विरुद्धः तत्र खलु भगवदनु यद्गंगाकल्लोलमासादो ७२
ग सितस्तकलजुरितस्तमुदाये दृते शंखचक्रादिधारणे केचित्
कलिकालबलविलसितहृदांतास्वांताः भगवदभक्ता वि
मन्यंते त एवं द्रवन्त नहि चक्रादिधारणे कर्तव्यतायां प्रसक्त

मनुमानं तावत्प्रमाणं भवति तयोर्धारणे प्रामाण्यास्त्येव तु न चक्रा
द्यनश्रुतिरेतद्विषया पठ्यमाना सुशाखासु दृश्यते न चोऽखिलाः
स्मृतयस्ताः श्रुतिवै विश्वासाभावात् केषांचिदत्ति सारसि
कानां श्रुतिस्वरूपवाक्यकल्पनायामपि संभावितत्वात्तेना
पि सकलाचारसंग्रहप्रवृत्तौ मनुयाज्ञवल्क्यप्रभृतयोऽपि च
क्रादिधारणं संगृहीतवंतः अपि च क्रियाकरणादि नि
षेधवदर्थान्निषेधसदर्थान्निषेधस्यैव भवच पंचरात्रादिशास्त्रं
तस्य कर्तव्यतां बोधयतीति तस्य प्रामाण्यानंगीकारात् अंगी
कारेऽपि वा तस्य संकर्षणादिप्रतिष्ठां ते भगवद्भुस्वादि

षु च तात्पर्येण सदाचारा तात्पर्याद्दर्शनात् न च शिष्टाचारादस्यानु
ष्ठानं प्राच्योदीच्यमध्यमदेशवर्त्तिभिरनेकैः शिष्टैरनुष्ठानाद
र्शनात् क्वचिदाक्षिणात्यैरनुष्ठानं मातुलसुतापरिणयना
दिवत् सदाचारत्वमवगमयतीति न चान्यधर्मवत् प्रमा
णमस्ति अतो न चक्रादिधारणस्य सदाचारत्वमिति तदसत्
श्रुतिस्मृतीतिहासपुराणसात्विकागमसदाचारैरस्य
सदाचारत्वावगमात् तत्र तावच्छ्रुतयः पवित्रं ते विततं ब्र ७३
ह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः अतप्ततनूर्न तदा
मो अश्नुते शृतास इद्वहन्तस्तत्समाशत अर्को देवानां

परमे वियोमात्रमिति सामवेदे ब्रह्मणस्पते चक्रमुखस्याधिना
यक प्रभुस्त्वं सर्वेषां गात्राणि शरीराणि पर्येषि व्याप्नोषि व्या
पकस्य तव पवित्रं चक्रं विततं अस्तीत्यर्थः तवं चक्रं सुदर्शनं स
हस्रारं पवित्रं चरणं पवित्रमिति नैघण्टुशास्त्रे पवित्रं चरणं चक्रं
लोकलोकद्वारसुदर्शनपर्यायवाचकाद्येते चक्रस्य परमात्म
न इति नेमात्तप्ततनूः अत एवा आमः अपक्वः अदग्धपापइ
तियावत् सः तत्र श्रित्वं मोक्षलक्षणं सुखविशेषं नाश्नुते
तत्पवित्रं सदा वहन्तः शृतासः परिपक्वाः तत्सुखभ[illegible]
वन्तीत्यर्थः अत्रातप्ततनूरित्यस्य प्रतिसंबंधितया वहन्त

ऽस्कन्नेतत्प्रधारणामेवावगम्यते॥ अस्या एव तात्पर्यं सामवेदशा
खायां काञ्चनस्य विविशिष्टीकरोति पवित्रमित्यग्निः॥ अग्निर्वै
सहस्राक्षः सहस्रारो नेमिः नेमिनात ह्येतत् ब्राह्मणः॥ सायु
ज्यं सलोकतामाप्नोतीति अत्र नेमिशब्देन नेमियुक्तं चक्र
मुच्यते सहस्रारशब्दानुगुणत्वात् अन्यत्सुगमं अथर्वणे चक्रं
बिभर्ति वपुषाभिरक्षितं बलं देवानाममितस्य विष्णोः संबंधि दे
वानां बलत्वं अग्नितत्त्वचक्रं ये वपुषाविभर्ति सदुरिता निवि ७५
धूय वीतरागाः यत्पदं विशन्ति तं नाकं परमं पदं प्राप्नोतीत्यर्थः
बृहदारण्यके निचिह्नेपसुषणां च्छिद्यमानं मध्ये बाहुमद्ध्यसुदर्श

नं विष्णोरिदं हरि तेजः प्रधर्षन्ति दिवानक्तं बिभ्रयुक्तजनास्म इति यो
विष्णुर्मध्ये बाहुं बाह्वोर्मध्ये सुदर्शनिमदद्धमर च्छिद्यमानं अनेक प्र
कारेण विजल्पमानं नाना विधमितियावत् मध्ये च्छिद्यमानं कर्म
णां प्रयोगः छांदसं लटि रूपं सुखाणामित्यंतकं ज्ञाप निवारकत्वा
त् निचिह्नेप हि महतामथात हरिदं बाहुफलस्य मिदं सुदर्शनं ह
रितेजः बाहुलं शत्रुस्थाम धर्षा प्रधर्षन्ति पापराशिं नाशयन्तीत्यर्थः
तत्र स्माज्जनाः दिवानक्तं बिभ्रयुरित्तिसुषणामित्तिषोतु कर्मणि
वद्ध च बाह्वलसंहितायां प्रत्त विष्णो अत्र चक्रे सुतप्त इति
पापाः जन्मांतोधि तत्रैव चर्षणीन्द्राः मूलेबाह्वोर्दधत्यन्ये उ

राणां लिंगान्यंते तावकान्यर्पयंतीति हे विष्णो ते पवित्रे शांखचक्रे
अन्योन्ये धिंसर्त्वे वेचर्षणीं प्राङ्गं मपरिष्कृणं बाहो ... दधाति
तर्वे संसारं तर्त्तुं अन्ये पुराणोक्तषयः तावकानि लिंगानि पंचा
युधानि अंगे शरीरे अर्पयंतीति कथंभूतं धृतोर्ध्वपुंड्रस्तत्तच
क्रधारी परं विष्णुं ध्यायंति यो महात्मा स्वरेण मंत्रेण यदा हृदि
स्थितं परात्परं यन्महतो महांतमिति यो महात्मा सदा हृ
दये निविष्टं तं परतोपि परं महतोपि महत्तरं विष्णुं यदा स्वरे ७५
ण प्रणवेन मंत्रेण ध्यायति स तदा धृतोर्ध्वपुंड्रः सत्तचक्र
धारी च स्यादित्यर्थः महोपनिषत्सु दिव्यहस्तः स्कंदकृत्

हितायां चमूषच्छेनः शाकुनो बिभ्रत्वा गोविंडुरिव आयुधानि बिभ्रत्
अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति इत्यस्य व्याख्या
णावस्थ्यत्वतः चमूषत् कर्म वच्छेनवत् द्यावापृथिव्योः पर्या
यदत्यानि षाधनसंचरन् श्येनः शाकुनः श्येनवदात्मानं अंतश
क्रो डीवः गोविंडुः गोविंदस्यायुधानि बिभ्रत् बिभ्रत्यादित्यर्थः
बिभ्रत्वान् ज्ञायुधधारणं कृत्वा छांदसत्वात् ल्यप् प्रत्ययाभावः अ
पामूर्मिं अब्धिकारं त्वतं समुद्रवदपारं संसारमंडलमिति यावत्
सचमानः क्रमेण निरस्तन्नू महिषो महिष्ठः तुरीयं धाम अक्ष
यस्थानं परं पदं विवक्ति ध्येवेति प्राप्नोतीत्यर्थः अन्येवं व्याचक्ष

तेऽरूपांमूर्त्तिंअव्यक्तिकारमूर्तंससुखवदन॥ अस्यसुखंचजगत्सेवमा
नःयोऽस्माःपरमात्मैकदेशात्तेजीनःसगोविंदस्यौकधानिवि
भूत ब्रिजत्त्रियाश्च॥ श्येनवदात्मानमुन्नेतुंसमर्थः क्विन्मवास्वसं
बंधिनाभपिन्तरणेसमर्थःच्यमृषत् द्यावापृथिव्योःसुखंनि
षीदनूत्वा मरिभरनीथःतुरीयंधसमतक्रक्षसंस्थानं विव
क्रिष्येवत इति॥ षचसमवायइतिअस्माद्धातोःषानच्च विन्नवा
विभूर्वान॥ कृतनूधारणपोषणयोरित्यस्माद्धातोः अन्येत्वो ७६
पिधस॰ उत्पादश्यपत इति॥ कनिपिभ किंचरूपंशकृतःशा
क्रोत्यात्मानमुन्नेतुमितिनिरुक्तं॥ चमूषवत् चसुषोरोदा

सीतिवेदनिघंटुः॥ गोविडःछांदमःस्तद्भूनूत्तावः अविमहिम्नापांइन्द्र
षजिम्भिच॥ विचक्रिसिषक्तिजुषत् इतिसैवार्थाइतिनामानुक्रमणि
कायां॥ अथर्वणे॥ एत्निर्वयसुरुविक्रमस्यचिक्रोरंकितालोकेसुत्र
गात्तवामः॥ तद्विष्णोःपरमंपदंतेगछंतीत्युक्तांछित्ताःएत्निरितिप्रत्र
तश्चक्रादिपरादर्शः॥ उरुक्रमस्यत्रिविक्रमस्येतियावत् अन
सुगमं काष्ठके चरणांपवित्रंवितत्तंपुराणांयेन पूतस्तरतिदु
ष्कृतानितेनपवित्रेण शुद्धेनपूताः अतिपाप्मानमरातिंतरे
म॥ येनचरथचरणाशब्दस्तोकापवित्रंचरणंचक्रमितिनिघं
टुपाठात् चरणाशब्दःसुदर्शनपरःपवित्रंपापनंयतःस्वसंबंधि

नसकजमपिपासमुदायनिवारयति ॥ अतोतीवपावनमितिवाक्या
र्थः ॥ शुद्धेनस्वतः पवित्रेणस्वसंबंधिनामपिशुद्धिहेतुभूतेन
चरणेनशुद्धता ॥ तदंकनेनशुद्धाः पाप्मानं पापमरातिंशत्रुंअति
तरेमअतिक्रम्यवर्त्तिषीमहीतिस्वात्मन्याशासनं ॥ तथालोकस्य
धारर्चिर्भिःपवित्रंज्योतिष्मत्भ्राजमानमहस्यत् ॥ अमृतस्य
धाराबहुधादोहमानंचरणंनोलोकेसुधितांदधातु ॥ अर्चिभि
तुअर्चिष्मत्ज्योतिष्मत्महस्वदितिज्वालाकरणंप्रकाशत्वेदस्य ७१
विवक्षितत्वात् ॥ अपौनरुक्त्यंतच्चसुदर्शनस्यस्वतोदेदीप्यमान
त्वयाधारणादशायांतद्भूतयावाउपपद्यते ॥ अतएवभ्राजम

नशोभमानंपवित्रमितिपावनिवर्त्तकमुच्यतेलोकस्यधारमितिउ
स्वर्गादिलोकप्रापयिता ॥ अमृतस्यधारा ॥ बहुधादोहमानमितिमो
क्षहेतुत्वमिति अमृतस्यधाराःमोक्षानुभावात्ताःसुप्रतिष्ठिता
नः दधातुकरोतुस्वयमेवबहुधानानाविधोपायैर्दोहमानंउ
त्पादनं ॥ छांदसःशप् ॥ एतादृशंचरणंचक्रंलोकेअस्मिन्नः अस्मान्
सुधितान्सुधीतान्सुप्रतिष्ठितान्दधातुकरोतुस्वयमेवस
कलपुरुषार्थसाधनंतथानःपुरुषार्थोपायेप्रस्थानंचदानुकरो
त्वित्यर्थः ॥ अस्यापिसर्ववन्मंत्रानुगुणपास्वदेहधृतंचक्रमेवकरोती
ति अवगम्यते ॥ शाखांतरेचक्रमादायाभोतप्यातिब्राह्मणस्याथ

दक्षिणेबाहौधारयेत् चक्रसुपविशतियं पांचजन्यंआद्यस्नोभप्पति
ब्रह्मणस्योत्तरबाहौधारयेत् ब्रह्मवादिनो वदंतीति देवा येन दृ
ष्टेनबद्धनासुदर्शनेनस्वर्गमायन्॥ येचांकितामनवोलोक
स्य ष्टिं वितन्वंति ब्राह्मणास्तद्वदंतीति॥ वषट्ते विष्णो अन्नं किमा
दायस्वस्वदग्धचक्रेणनिर्ऋतिपरदांज्ञिचाभयंचातिमत्स्कंतरे
मेति॥ अनरण्याथर्वणे॥ अग्निनावैहोताचक्रंपांचजन्यंसुतप्तंधि
चुजैौस्तरयेंते आत्मकृतमाचरेदाचार्यायस्वसुखंप्रपद्येत तस्मा
देक्षेणोत्तवतिऊनरागमनंसायुज्यंसलोकतामाप्नोतिइत्युपनि
षत्॥ नन्वेतासांश्रुतीनांपद्यमानासुशाखासु अदृष्टानांसत् ७७

वकथंनिश्चिनुमः॥ मेवं पवित्रंतेविततं चरणंपवित्रमिति॥ अनयोर्म
त्रयोस्तैत्तरीयशाखायामेवपठितत्वात्॥ अन्येषामपिमंत्राणां नगव
छास्त्रेपाद्मत्वेनकस्यस्य अकारोपात्तत्वेनचयज्ञोपवीतंप्रसुग्मतामे
वादिवदस्तंदिण्धश्रुतित्वं अन्यथाखिलश्रुतीनामविश्वासएव
प्रसज्येत॥ नचैतावतापि एषांश्रुतित्वंनसिध्यति वेदानुपात्तानांस्व
शास्त्रपठितानामेवमंत्राणांचपंचरात्रेणतत्रमुसविनियोगदर्शनात् य
थाकृभारते॥ अभावेवेदमंत्राणांपंचरात्रोदितान्वै इतिऊतं कथंश्रु
तिचनिश्चयइतिचेन्नतद्वेदपारिपठितत्वेनैवतत्रोपादानात्तत्तच्छाखा
ध्यायिभरुषस्तद्यद्वेनविध्वनाद्देदयमवसीयतेछंदोमात्र नियता

नुशासनानुशिष्टशाण्डिल्याच्च तत्त्वनिर्णयात् ननु तर्ह्येवं यदि
पंचरात्रशास्त्रं प्रमाणं न भवेत् तदेवानांगीकर्मः तत्रास्त्र प्रतिपाद्य
करणादिविशेषस्य वैकुंठनगरमंडपादिसंस्थापनस्य संकर्षणा
दिकस्य चावेदसंवादादर्शनात् किंच वेदविरुद्धमेव जीवोत्पत्त्यादि
कं वासुदेवात्संकर्षणो नाम जीवो जायत इत्यादिभिः प्रतिपाद्यते किंचि
कस्य संवादस्य अहिंसादिवाक्यसंवादवद्वेदमूलत्वकल्पनायोगाच्चे ७५
तिचेत् तदेतत् कलिमलविलसितं तथाहि वेदाहं समतीतानि व
र्तमानानि चार्जुन वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव
चाहं इति स्वभावतो नित्यसर्वज्ञेन परमपदव्यापिना सकल

वेदविध्येन परमात्मेन भगवता नारायणेन स्वयमेव प्रणीतं पंचरा
त्रशास्त्रं अत्र प्रमाणमिति निश्चचनं कथमप्रमाणं न स्यात् अत ए
व महाभारते पंचरात्रस्य सर्वस्य वक्ता नारायणः स्वयं इति
वक्तृविशेषेण प्रामाण्यं प्रतिपादितं ननु मास्तु सार्वज्ञात्कर्तृज्ञा
नकर्तृत्वाद्यस्यादिदोषः तथापि प्रलिप्सा विद्यते अत एव बौद्धा
दिशास्त्रं प्रवर्तयामास तस्मात् कथमस्य विश्वसनीयत्वमिति चे
न्नैवं उक्तविधिनावाप्तार्थी बौद्धादीनाम सशास्त्र प्रवर्तकस्यापि
साधुपरित्राणार्थं स्वावतारशास्त्रप्रवर्तकं चोपपत्तेर्नकिंचि

द्विप्रलिप्सादृष्टेतिसर्वत्रतदाशंकातिप्रसंगात्तामसजनमोह
नायचार्वाकशास्त्रप्रवर्तकत्वेनबृहस्पतिनाप्रणीतायाःस्मृते
रनादरणीयत्वप्रसंगात् ननुसर्वमस्तुतथापीदंशास्त्रंनवि
प्रलिप्सामूलमितिकथंन्तवतोनिर्णयसन्वादीस्मृतीनांचक
थं विनीर्णयः वैदिकपरिग्रहदाढ्यादितिचेत्समानमत्रापि
सर्वत्रहिवैदिकाः संकर्षणादिप्रतिष्ठांतानिकर्माणिभगव ८
दुत्सवाराधनादीनिपंचरात्रमर्यादितैवानुतिष्ठंतियद्येव
मप्यत्रविप्रलिप्सादिनाऽप्रामाण्यमाशंक्येततदास्त

र्वस्मृतीतिहासपुराणानामपितत्प्रसंगोतत्रअथतत्रवेदमूल
त्वंअत्रापितत्समानंपंचरात्रशास्त्रेपिवेदप्रामाण्यप्रतिपा
दनाद्वेदस्यसंस्तावत् क्वचिद्वेदकर्तृपादायनस्यतात्पर्य
वर्णनात् बहुधा स्वस्वोक्तार्थस्यवेदवाक्यसंवादस्यस्वयमेव
प्रतिपादनात् वेदविरुद्धार्थस्यक्वचिदप्यप्रतिपादनात् वै
दिकैरेवपराशरनारदशाण्डिल्यहारीतादिभिः प्रवृत्तत्वात्चमहा
भारतादिषुबहुशः पंचरात्रशास्त्रस्यप्रमाणत्वेनोपपाद
नात् परिदृष्टाचारप्रतिपादकस्यस्मृतिष्वपिदृष्टत्वात्॥

ज्ञीवोत्पत्त्यादिवादस्य तदभिमानिसंकर्षणाद्युत्पत्तितात्पर्येणान्य
परत्वात् क्वचित्कविरोधप्रतिभानस्य स्मृतिष्वपि तुल्यत्वा
त् वेदमूलतया प्रमाणमेव पञ्चरात्रशास्त्रं श्रेयत्ते विशे
षः स्मृतिकर्तॄणां तपःप्रभावेनातिशयितं ज्ञानमुपरे
षां क्वचिदल्पे विप्रतिपत्तिः भ्रमश्च संजायते लोकेऽस्य संभ
वति विप्रलिप्सा अभिमानरहितत्वं च सर्वलोके दैवान्निर्णीयु ८२
तेन तदिदं शास्त्रं परमकारुणिकदयापरीवाद इति न किंचिदपि
क कप्रमाणं भवति न ह्याप्तं तदयालुः सर्वजनवत्सलः साधु

परित्राणाद्युक्त एवमध्ये विप्रलयितुमिच्छति अतोऽस्य वेदविरुद्धप्रतिभावे
ऽपि श्रुतिद्वयविरोधवत्तादृशश्रुतिद्वयविरोधवत्तादृशश्रुतिकल्पने
न विकल्पेनैव निर्वाहः न चैतत्तं बाधप्रयोजनयुक्तमिति स्वकृतश्लो
कः वादे वादे परं नौमि ध्वनिर्यस्याशु पापहा भ्रमरणाकालिकलोकानामसु
राणां च दर्पहः ॥ इति श्रीरामनाममाहात्म्ये श्रुतिस्मृतिपुराणेतिहास
॰ तात्पर्यविरचिते समसंग्र० ॥ इदं शास्त्रसमस्तादिभारताख्यानविस्तरात् ॥ आ
विरुद्ध मिति निर्मथ्यान दध्नो घृतमिवोद्धृतं नवनीतं यथा दध्नो द्विपदां ब्राह्म
णो यथा आरण्यकं च वेदेभ्य ओषधिभ्यो यथा घृतं इदं महोपनिषदं च
तुर्वेदसमन्वितं सांख्ययोगकृतान्तेषु पञ्चरात्रानुशब्दितं इदं श्रेयः इ

दं ब्रह्मरुद्रं दंहितमनुत्तमं ॥ ऋग्यजुःसामभिर्जुष्टमाथर्वांगिरसैरपि ॥ नवि
ष्यंति प्रमाणं वै एतदेवानुशासनमिति ॥ तस्मिन्नेवान्यत्र ॥ ब्राह्मणैः क्ष
त्रियैर्वैश्यैः स्वनिष्ठकृतलक्षणैः ॥ अर्चनीयश्च सेव्यश्च नित्ययुक्तैः स्व
कर्मभिः ॥ सात्वतं विधिमास्थाय गीतः संकर्षणेन यः ॥ द्वापरस्य युग
स्यांते आदौ कलियुगस्य चेति ॥ सात्वतं पंचरात्रे ॥ ब्रह्मांडे च ॥ ऋगा
द्यान्भारतं चैव पंचरात्रमथाखिलं ॥ मूलरामायणं चैव पुराणं चै
तदात्मकं ॥ ये चानुयायिनस्तेषां सर्वे ते च सदागमाः ॥ दुरागमास्तद ८
न्यथे तैर्न ज्ञेयो जनार्दन इति ॥ उत्तररामायणे ॥ पुराणैश्चैव वेदैश्च
पंचरात्रैस्तथैव च ॥ ध्यायंति योगिनो नित्यं क्रतुभिश्च यजंति तमि

ति ॥ तत्रैव पारमेश्वरसंहितायां प्रतिष्ठाध्याये चक्रप्रतिष्ठायां तत्र स्था
पनकाले तु तत्संज्ञं मनुं जपेत् ॥ विद्यां गदादिचिह्नोपात्ता पाठयेत्तद्वि
ज्ञान् द्विजः ॥ चक्रषट्केन सम्प्रोक्ते विष्णुरित्यृचोपाठ्य बह्वृचा स्पृश्य
सूक्तं शाकुनमेव च धृतोर्ध्वपुंड्रः सततं चक्रधारीति मंत्रं कठान्
प्रति ॥ पवित्रं ते विततमिति एतन्मंत्रं यजुर्मथात् ॥ छुराहरेति साम
ज्ञान पवित्रमित्यग्निरपि ॥ एभिर्वथमुरुक्रमस्येति अथर्वणवि
दो द्विजः ॥ सर्वं संस्नाप्य विधिवन्नवभिः कलशैस्ततः स्नापयेद्ब्राह्म
णाद्यैस्तैर्मंत्रैरेभिरेव चेति ॥ अत्रादावेव तत्र स्थापनकाले

तत्त्वसंज्ञं मन्त्रं जपेदिति वचनादेवं तेषां सुदर्शनस्थापने विनियोगा
त् सुदर्शनपरत्वं विस्पष्टमुक्तं ॥ अत्रैव स्नापनकलश विनियोगाव
सरे पि ॥ धृतोर्ध्वपुण्ड्रः स्तनेति यातुधानगतेन वै ॥ दक्षिणे तु भुजे वि
ष्ण्वितिपश्चिमगतेन वै ॥ विष्णुनात्तमश्नन्निति वायुदिक्संस्थिते
न वै ॥ अत्रैव संहितायां स्नापनाध्याये ॥ स्नापयेद्देवदेवस्य मध्यस्थ
नवकेन तु ॥ यद्वा सर्वस्य वशिनमित्याद्यैर्मनुभिः क्रमात् ॥ महो ३
पनिषदं तस्मै दिक्स्थितैः कलशाष्टकैः ॥ तत्रैवोत्सवध्याये स्मने
कोत्सवस्नपने धृतोर्ध्वपुण्ड्रः स्तनेति याम्यदिक्संस्थितेन वै द

२

क्षिणे तु भुजे विष्णोर्यातुधानगतेन वै ॥ विष्णुनात्तमश्नन्तीति वारुणीदिग्गतेन
तु तत्रैव रुक्मार्थेश्चूर्णस्नपने ॥ दक्षिणे तु भुजे विष्ण इति वायुसंस्थितेन
तु निखिलेषु भुवनेष्विति वह्निगतेन तु प्रतद्विष्णुः अब्जचक्रेइति याम्य
गतेन तु ॥ एभिर्वयमुरुक्रमस्येति यातुधानगतेन वै ॥ मंत्रैरेतै
रष्टाभिरन्यैः सुदर्शनैस्तथा संस्नाप्य मधुकुम्भेन शुद्धोदैरभि
षिञ्चतेति ॥ अत्र सौदर्शनत्वमेतेषां मंत्राणां साहचर्यादवसितमि
ति तथा कालोत्तरे सौदर्शनसमाराधनाध्याये ॥ एवं प्रसादशिखरे
चक्रं संस्थाप्य तु बुधः ॥ द्वादशारं तथाष्टारं षडारं वा महामते ॥ संस्था
प्य विधिवन्मार्गं तन्त्रेद्वादशभिः क्रमात् ॥ दक्षिणे तु भुजे वि

त्रइतिक्षीरेणाभिषेचयेत् ॥ एतन्निर्वर्यमुरुक्रमस्येत्याद्यमनगतेन धृतो
र्ध्वपुंड्रः स्तनचक्रेणेति चेत्तुरस्येनेत्त ॥ पवित्रमित्यष्टिरितिपंचगव्येनस्ने
चयेत् ॥ ब्रह्मस्वस्त्रस्यान्यत्राप्युपादानं दृष्टं यथात्री विष्णुतत्त्वे ॥ दिव्यांत
रिक्षभौमानामुत्पातानां प्रशांतये प्रत्यक्चं जुहुयादाज्यं ऋक्सूक्तेन शा
तेशांतं ॥ सर्वस्य वशीमेत्याद्येश्चतन्त्रिर्भिश्च शतं दधि दक्षिणे तच्चजे
विप्राद्यैश्चतन्त्रिश्चापि तंदुलैरिति ॥ तथान्यत्रा ॥ प्रत्यंगिनः शि ८
षाशीर्षं ब्रह्मस्वक्तं तथैव च ॥ वैष्णवं पौरुषं चैव अन्यान्मंगलवा
कानिति ॥ ब्रह्मस्वक्तमिति सर्वस्य वशिनेत्यादि मपकमुच्यते
॥ अप्रदेशेषु पात्त नामेतेषां मंत्राणां प्रसुप्तत्ता दिवत्सक्ष

तिवमसंदर्भासिद्धं ॥ अरिविजानामप्येतेषां मंत्राणां धृतां ज्ञष्यादिस्त
वततत्संप्रदायात्सूर्यपाणासिद्धिः ॥ ननु भगवत्शास्त्रे सौदर्शने
कर्मणि विनियुक्तानामेतेषां मंत्राणां सिध्यत्वत्रकृतिश्चेत्तथापि स्रु
त्या काण्वकाग्न्यारुणकेतु धर्मान्निष्वादिषु विनियोगादेषां कथं
सुदर्शनपरत्वमिति चेन्मैवं ॥ किमन्यत्र विनियुक्तस्यान्यत्र विनियो
ग एव न संशयं भवति उत्तर क्रत्या विनियुक्तस्यान्यत्र क्रत्यादिभि
र्विनियोगो न युक्त इति अथवा ॥ यत्र क्रत्ति विनियोगः तदर्थपरत्वमेव
मंत्रस्य युक्तं मन्त्रस्मृति विनियोगानुसारेण तदर्थपरत्वमिति अत्रा
चेपि किमत्र स्वरूपाविरोधात् विनियुक्त विनियोगोनसंभ

ति अर्थप्रकाशलक्षणकार्यविशेषाद्य । नाद्यः मंत्रस्यानुष्ठेयार्थप्र
तिगुणभावगुणानांच यावत्प्रधानमावृत्तेर्ज्यायस्त्वात् । यत्र यत्रा
र्थविनियोगस्तत्र सर्वत्र मंत्रस्यावर्त्तनत्वेनानेकत्र विनियोगावि
रोधसत्त्व । यथास्तोत्रे विनियुक्ता या अपि आग्नेय्या आग्नीध्रमु
पतिष्ठत इति आग्नीध्रोपस्थानेपि विनियोगः । यथा वा ड्रूप
स्तुक्तस्य प्रायश्चित्तजप विष्णोराधनं मोहवशाद्युपस्थान ८५
मंत्र मापणयज्ञमानोपस्थानादिषु विनियोगः । द्वितीयेपि
किमर्थप्रकाशस्यार्थप्रकाशकत्वं विरोधः अर्थकार्यप्रका
शस्यार्थप्रकाशत्वं विरोधः । अर्थैकार्यप्रकाशस्य तदन्यप्र

काशकत्वमिति आद्येपि पक्षे किमेकस्मिन्नेव प्रयोगे अर्थप्रकाश
कत्वं तदन्यायथा विरोधः । उत प्रयोगांतरेपि नाद्यः अभ्युपगम्य
त एवमयापि एकस्मिन्नेव प्रयोगे मंत्रस्यार्थप्रकाशकत्वं तदनावि
विरुद्धाविति न ह्युक्तं मयाप्येकस्मिन् प्रयोगेन उभयं नापि द्विती
यः । प्रयोगांतरेषु विरोधपरिहारात् न च विनियोगांतरेप्यार्थ
प्रकाशकत्वमेव यथा कथं विज्ञोएपालक्षणप्रावाचृस्यात्तदर्थप
रत्वस्यापि वर्णयितुं शक्यत्वात् नापि द्वितीयः । प्रयोगभेदादेवावि
रोधः । लोके प्रयोगभेदेन गीतोश्विगांकर्षतीत्यादिषु गोशब्द

स्यान्नेकार्थ्यं दृष्टं अतोत्रापि युज्यत इति को विरोधः अत्र चेयं स्थितिः
यद्येकस्य मंत्रस्यानेकत्र विनियोगस्तदा श्रुत्यादिशब्दवशात् सर्वत्र
श्रुतिरत्र यौगिकी वा वृत्तिः अथ यद्येकत्र मुख्यत्वमपरत्र गौणी
लाक्षणिकी वा वृत्तिराश्रयणीयेति अत्र तु सौ दर्शनेकर्मणि
विनियुक्तानामेतेषां मंत्राणां मुख्ययैव वृत्त्या तदर्थपरत्वं प्राग
व दर्शितं अत एव तेषां मंत्राणामारुणकेतुकादिषु विनियुक्ता ८
नामपि सौप्दर्शनेकर्मणि विनियोगो न विरुध्यते एव अत एव
विरोधात् श्रुत्या विनियुक्तानामप्येषां स्मृत्यात्रापि विनियो

गो युज्यत इति द्वितीयोपि पक्षोनुपपन्नः विरोधे हि श्रुत्या स्मृतेर्बाधि
तत्वविरोधे तित्र संगात् न च स्मृत्यान्यत्र विनियोगेपि श्रुतिविनि
योगस्य विषयसंकोचो ज्ञायते येन विरोधः स्यात् सर्वत्र विष
यसंकोचस्थल एव विरोधो दृष्टः ननु यदि श्रुत्यादिनियुक्तस्या
पि मंत्रस्य दुर्बलयापि स्मृत्यान्यत्र विनियोगो विरुध्यते तर्ह्यैंद्र्या
गार्हपत्यमुपतिष्ठत इति श्रुत्या गार्हपत्योपस्थाने विनियुक्ता
याः अप्यैंद्र्यामपि विनियोगः स्यात् विरोधसमानत्वेन श्रुत्या लिंग
बाधवद्योगात् अथोच्यते सत्यं नास्ति विरोधः तथापि लिंगस्य

स्वात्ताविनियोगेऽप्रामाण्यान्नागाद्विनियोजकश्रुतिकल्पनाद्वारेण
विलंबितप्रमाणत्वात् श्रुत्यादिशीघ्रं मंत्रविनियोगे तत्कल्पनानु
पपत्तेर्लिंगमविनियोजकमिति श्रुत्या बाध्यत इत्युच्यत इति चेन्नैवं
स्मृतेनावपि तुल्यत्वात् तथा हि स्मृतिरपि न साक्षाद्विनियोगे प्र
माणं किंतु श्रुतिकल्पनया द्वारकल्पना च प्रत्यक्षश्रुत्याशीघ्रं विनि
योगेन संभवत्येवेति लिंगवत्स्मृतेरपि बाध एव स्यादिति न कश्चि
द्विशेष इति नैतद्युक्तं वैषम्यात् तथा हि न हि लिंगबलेनानेन मं
त्रेणेंद्र उपस्थेय इति विनियोगः साक्षाद्बोध्यते किंच यं मंत्र

इंद्राभिधायक इति एतावत्यवगतेः पश्चान्मंत्राकांक्षाबलेन तत्र वि
नियोगः कल्प्यते श्रुत्या तु शीघ्रं गार्हपत्योपस्थाने विनियुक्ते इंद्रपदस्य
गार्हपत्यप्रकाशनोपक्षीणत्वान्निराकांक्षीकृतत्वान्मंत्रस्य न तन्मू
लाश्रुतिकल्पनोन्मिषतीति बाधकाभावेन विनियोगो न संभवती
ति श्रुत्या लिंगं बाध्यत इति युज्यते स्मृतिस्तु साक्षाद्विनियोगं बोध
यति न मंत्रादिकं स्तोत्रादिकमपेक्षते बोधिते त्र विनियोगे स्वप्र
माणपसिद्ध्यर्थमेव मूलभूतां श्रुतिमनुमापयति अनुमानमप्याकां
क्षानिरपेक्षं प्रत्यक्षश्रुतिविरोधे निरंकुशप्रसरमेवेति विनियोजि

केस्मृतिः श्रुतोनात्रस्मृतास्मन्तेर्बाधः यथाप्रबलेनाप्युपदेशेनप्रवृ
त्तोविनियुक्तानामप्यंगानांदुर्बलेनाप्यतिदेशेनविकृतौविनियो
गोभवतिनचकश्चिद्विरोधस्तथापिदुर्बलस्यबाधस्तद्वत्रापिदुर्बला
यापिस्मृत्यामंत्रस्यान्यत्रविनियोगः॥ किमतिनोपद्यतेकतिक
तिवानदृश्यतेस्मृत्याविनियुक्ताः। अपिमंत्राःस्मृत्यास्मार्त्तेष्वकर्म
सुविनियुक्ताःएवंश्रुतिस्मार्त्तकर्मसुमंत्राणांप्रायशोन्नावएकस् ९९
तु अतः श्रुतिविनियुक्तानामप्येषांभगवच्छास्त्रेणान्यत्रविनि
योगोऽस्त्वतएवेतिनापितृतीयः॥ तत्रापिकिंविवक्षितं॥ किं

श्रुतिविनियुक्तस्यसाक्षादर्थप्रतिपादकत्वमेवनसंभवतिउतश्रौ
तस्यैवमुख्यार्थःस्मार्त्तार्थेतुमंत्रस्यगौणीलाक्षणिकीवावृत्तिरा
श्रयणीयेतिनाद्यःस्मार्त्तविनियोगानुसारेणतदर्थपरत्वस्यापि
युक्तत्वात्प्रयोगभेदेनैकस्यापिमंत्रस्यानेकार्थप्रतिपादकत्वंविरुध्य न
तइतिउक्तमेवनापिद्वितीयःशब्दशक्तेःश्रुत्यावानियंतुमशक्य
त्वात् अतःश्रौतेवास्मार्त्तेवात्रशब्दशक्तिस्तत्रमुख्यतात्परत्रगौ
णीलाक्षणिकावावृत्तिरित्येववक्तव्यंनतुकश्चिन्नियमःशक्यः
कर्त्तुंयदिचश्रौतविनियोगेसर्वत्रमुख्यएवार्थःस्यात्ततःकथं
न ह्यभ्युपगम्यतएवायंनियमः नतुतदप्यस्तिऐंद्र्यागार्हपत्यमु

ष्टतद्रूपत्वलक्षणादिन्निमंत्रस्य गार्हपत्यार्थस्य मीमांसकैरुक्तपात
त्वात् अतएव एतेषां मंत्राणां भगवच्छास्त्रेण सौदर्शने कर्मणि विनि
युक्तानां शब्दशक्त्यनुसारेण तदर्थपरत्वमेव युक्तं अन्यत्र तु सत्यपि
श्रुतिविनियोगे गौणी लाक्षणिकी वा वृत्तिराश्रयणीयेति शि
ष्टं सुदर्शनपरत्वं स्यादेतत् अस्तु सुदर्शनपरत्वं तथापि सौदर्शन
कर्मणि अन्यत्र च विनियुक्तानामेतेषां मंत्राणां विधिविलक्षि
तत्वानां अर्थवादानुवादस्वरूपाणां विधिपरत्वं अविधेयस्य चा २५
नुष्ठेयत्वात् सुदर्शनधारणस्यावश्यकर्त्तव्यतानाभिधानादिति अ
त्रापि चिंतनीयं किं विनियुक्तत्वादेव विधायकत्वं उत मं

त्रत्वादेव आद्ये स्वीकृते विनियुक्तत्वे सति मंत्रत्वात् यद्वा विनियुक्तिरहि
तस्य अथवा अनुवादलिंगत्वात् इति नाद्यः जपपारायणनै
मित्तिकाध्ययनादिषु विनियुक्तानां विधायकत्वप्रसंगात्
किंच॥ गुरुमते अध्ययनस्य नियोगार्थत्वात् स्वाध्यायस्य चाध्य
यनशेषत्वेनाध्ययनविध्युपेतकृत्स्नस्वाध्यायविनियोगाद्विधि
कर्थैवोच्छिन्नास्यात् भट्टमतेपि स्वाध्यायसंस्कारार्थरूपस्वाध्या
यार्थज्ञाने विनियोगे स्वाध्यायस्यापि तत्र विनियोगः सिद्धांत
ति यथा सामान्यास्तु वत इति लिंगद्वारसंस्काररूपस्य सामान्यः स्तोत्र
विनियोग इत्यभ्युपगमात् कृत्स्नस्वाध्यायस्यार्थज्ञाने वि

नियोगात् सर्वत्र विधिर्न स्यात् न द्वितीयः मंत्ररूपस्यैव कपिंजला
नाजमेतेत्यादेर्विधायकत्वस्य मीमांसकैरंगीकारात् नापि तृ
तीयः विनियुक्तत्वमंत्रत्वमंत्रत्वयोर्विधिविरोधत्वाभावेऽसमु
चितस्यापि तद्विरोधित्वासंभवात् किंच विनियुक्तविशेष
णीभूतस्य विनियुक्तस्य मंत्रस्यैवाभावात् यागदानहोमा
दिषु विनियोगसंभवात् अत एव उपपद्यत एव विनियु १०
क्तस्यापि मंत्रस्याम्नायार्थविधिपरत्वं यथोक्तं भट्टपादैः वि
धिशक्तिर्न मंत्रस्य विनियोगेनापनीयते स्वतो विध्यस्पृ
ष्टनियोगं स्मारयिगं स्मारयिष्यति इति नियोगो विनियो

गः नापि चतुर्थः विधिविनिर्मुक्तिरहितानां वर्तमानापदेशरूपाणां
उपांशुयाजमंतरायजतीत्यादिना आम्नायार्थत्वेन विधायक
त्वाभ्युपगमात् आम्नायस्य तावत्स्वात्मविधि विधिकल्पनया ना
मधिकुरूपोत्थयष्टव्यः प्रजापतिरूपांशुयष्टव्य इत्यादीना
म विधायकत्वात् अत्र हि मांत्रवर्णिकदेवतानुवादकत्वमव
स्थापितं अतः परिकल्प्य विधिं नक्तिं प्रमाणांतराभावस्तु दर्शन
धारणा विधायकत्वमेतेषां मंत्राणां वर्णनीयं नापि पंचमः स
र्वानुवादलिंगनिवृत्तकस्याभावस्य विद्यमानत्वात् न हि लिंगा
न्यनुवादकत्वं कुर्वंति किंतु अनुवादस्य सतस्तत्त्वं बोधयंति

अत्यंताप्राप्तेर्थे न स्त्येवानुवादकत्वमिति कथं तत्प्रत्यापयेरन्
अत एव वक्ष्यो ऽष्टाकपालः परिहितदेवन्योद्धारयंतीत्यत्र
विधिरेवाश्रितोनुवादलिंगन्तत्त्वेपि अतोनानाप्रदेशोक्त
त्तगवक्त्वास्त्रोपादानेनासंदिग्धत्वमितिभावः श्राद्धचंद्रिकास्वार
स्यावगतत्त्वदर्शनादिधारणस्य विषयत्वं सिद्धमिति सिद्धं
वश्यककर्तव्यता तत्प्रचक्रादिधारणस्य ॥ तत्परत्वेदवचनैरने १३
के विहितत्वात् ॥ अनिषेधश्च कार्यः स्यात्तप्तचक्रादिधारणे
किंच ॥ एवमनेकश्रुतिसिद्धस्य निषेधः कापि न दृश्यते ननु
स्वशरीरे न्यदेहे वा न वेदत्रिकिणी द्विज इति किणकरणं ॥ नि

षिद्धं तप्तचक्रादिधारणं निषिद्धं इति चेन्नैवं अत्र द्विजशब्दो ब्राह्म
णवचनः तस्य त्रिकिणकरणं निषेध्यते त्र यश्चत्ते किणास्त्रयमाघेत
युद्धद्युत निरंतराभिधारण निभिन्नाइति तद्व्याख्यातन्निरेवव्या
ख्यातं यदि किणमात्रनिषेधपरता स्यात्तदा त्रिशब्दो निरर्थकः
स्यात् अतो नानेन तप्तचक्रादिधारणनिषेधः ननु नभर्यं दे
वताचिह्नमिति देवताचिह्नधारणनिषेधात्तस्यापि निषे
धः प्राप्नोतीति चेत्तन्मीमांसान्यायानभिज्ञानामज्ञानाम
ज्ञानविजृंभितं तथाहि देवताचिह्नधारणं सामान्यतो निषि
ध्यते विशेषस्य श्री विष्णुचिह्नधारणं एवं सत्यपीशाभीय

पश्चालंबनवचं विधिनाप्रत्तंहासा निषेधबाध्यत्वं चक्रादिधारणविधिना
सामान्यस्य निषेधस्य बाध्यत्वास्तु न तु स्मृतिविहितेन सामान्यनिषेधेन
श्रुतिशतप्रतिपन्नस्य विशेषरूपस्य तप्तचक्रादिधारणस्य बाधनं कु
र्यं गम्यं एवं येष्वपात्रान्ये सामान्यनिषेधास्तेषां सर्वेषां एतैर्विधिभिर्बाध एव यु
क्ततरः न च तप्तचक्रादिधारणं न कर्तव्यमिति एवं विधिविशेषरूपेण
निषेधकं वाक्यं यस्य कस्यापि शास्त्रेषु यथमवतरति यदि चाप्यस्ति तत्
तु पक्षस्य मानस्य यागगतारविंदकल्पमपि तादृशं वचमाशंक्यते ता ८२
दृशं स्वजननीव्यभिचारशंकया स्वस्यापि ब्राह्मण्ये न विश्वसेदिति ॥ श्
रूयमाणमपि वाक्यं श्रुतितयाशक्यते श्रुतितया वा न द्वितीयः

तस्य स्मृतिवाक्यस्यानेकश्रुतिविरुद्धस्याप्रामाण्येनादरणात् विरोधा
धिकरणसिद्धं हि श्रुतिविरुद्धं स्मृतेरप्रामाण्यं नापि प्रथमः । स्यापि श्रु
तिः । किरागादिप्राप्तत्तस्य चक्रधारणं निषेधन्ते विधिप्राप्तं वा नाद्यः तप्तच
क्रादिधारणस्यऽऽस्वस्वरूपत्वेन रागप्राप्तत्वात् न द्वितीयः निषेधस्य प्रापकस्तु श्रु
पजीवितया प्रापकस्य शास्त्रस्योपजीव्यत्वेन तस्य बलवत्त्वात् तेनैवास्य बा
धप्रसंगात् यत्रापि सामान्यांतरूपो विधिः येयजामहे करो
तीति विशेषरूपस्य निषेधः नानुयाजेषु येयजामहे करोतीति तत्रापि नि
षेधस्य दुर्बलतया विधिबाधकतायोगान्निषेधस्य तेनात्यंतबाधयोग

ड्विकल्पस्याप्यदृष्टदोषदुष्टत्वाद्विधिवाक्यशेषभावो निषेधस्य पर्युदासाश्रय-
णांगीकृत्य तस्मात्र निरूपणः पर्युदासाधिकरणः समविषमयोस्तु विधिनिषे-
धयोर्विषिमा बाल्यं किमुत वर्ण्यते अतोऽत्र न तप्तचक्रादिधारणबलाद्व-
वत्तन्निषेधस्य बाधो युक्तः ननु विधिना निषेधश्चेत् कथमत्यंत-
बाधउपपद्यत इति चेत् निषेधेनैव कथं विधेर्बाधः तर्हि विकल्प-
साभाश्रयणीय इति चेन्नैवं तुल्यबलविरोधे हि विकल्पः न चात्र ५३
तुल्यबलता निषेधस्य विधिकपत्नीव्यत्वेनत्फलवत्वात्किंच एक-
र्थसाधनत्वे हि विकल्पः न तप्तचक्रादिधारणं च पुरुषार्थसा-

अनंतश्च यदि तदनुष्ठानेऽपि स्यात्प्रत्यतेततोऽवश्यमेतत्सादिधारणे को-
पानमयनां बलं चालयेत् ततश्च विधेरनुष्ठानलक्षणासंभावनाप्रामा-
ण्यं स्यात् तस्मात् युक्तं तस्य प्रबलत्वात् अतो न विकल्पसंभवः नन्वेवं त-
र्ह्यतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्यत्र विक-
ल्प एवेति मीमांसकानामालापः कथमिति चेत् उक्तं यदा त्रिरात्र-
शीघ्रमवसमापनीयः अत्यन्तासोमरसस्तदा षोडशिग्रहण-
परित्यागेऽपि न क्षतिर्वैगुण्यं अन्यथा षोडशी ग्रहीतव्य इति विधे-
रत्यंतबाधप्रसंगाद्विकल्पवाचोयुक्तिस्तत्र अत्र तु तप्तचक्रा-
दिधारणसाध्यस्य पुरुषार्थसाधनत्वे सिद्धिः धारणेऽपि शिष्टैः

धारणेपिसिद्धिः तदानकथंचिदपिधारणंस्यादितिविधेरत्यंतबाध
एवस्यात् नत्रविकल्पोप्यदिनमिथ्यातितदाऐकान्त्यावात् सुतराम
विकल्पइतिः अतोत्रनिषेधेन विधेर्बाधो विकल्पोवा विधेरत्यं
तबाधः प्रसज्येतइतरथातुनिषेधस्यात्यंतबाधः नान्यागति
रस्तिनत्र प्रबलतयाविधेर्निषेधस्यदुर्बलत्वेतयाविधिनेवानि
षेधबाधोयुक्तः ननुनिषेधेनविधेरितिननुविधिनिषेधयोरु
भयोरप्यत्यंतबाधः विषयभेदादविरोधएवानयोर्वर्णायितुंयु ५४
क्तइतिचेत् नविषयव्यवस्थापकवचनादर्शनात् विषयव्य
वस्थायामपिद्विदिणोत्रभुजेविप्रोवित्तयाद्वैसुदर्शनमिति

वचनात्स्वाल्पविषयतयाव्यवस्थास्यादितिब्राह्मणस्यावश्यंधार्य
मेवस्यात् निषेधोपियदिविषयस्यैवकल्प्येततत्तोनविषयव्यव
स्थाशक्याकर्तुंनचाश्रमभेदेवाव्युक्ता ॥ ब्रह्मचारीगृहस्थोवावा
नप्रस्थोयतिस्तुकः ॥ अवश्यंधारयेच्चक्रमाश्रितस्तमतंद्दितइति
सर्वेषांविधनात् ॥ किंच ॥ अनेकवचनैस्तप्ताद्धिधारणस्यचवर्
णिमपिवर्णानां विहितत्वान्तकेनापिप्रमाणेनविषयव्यवस्थे
तिविधिनानिषेधबाधएवननुश्रुतेरत्यंतबाधनंवैदिक
प्रमाण्यासहृतमितिचेन्नवयमत्यंताप्रामाण्यंवदामः किं

उयथा प्रत्यक्षादिविरोधप्रदादित्यो यूप इत्यादीनां गौणत्वमाश्रितं
तद्वदत्रापि निषेधस्य गौणीलाक्षणिकी वा वृत्तिराश्रयणीयेति त
स्मात्प्रिणालाक्षणिकार्थत्वं वा नांतरीयकेन दिवाग्निश्चेतव्य इत्यादि
वत् अत्यंताशक्तं प्रति नित्यानुवादकत्तया वा मा तत्र प्रातरन्वतं
तवदेति पुरोडाशादज्जुक्तनियोग्निहोत्रमित्यादावनुदितहोमनि १०५
षेधस्य उदितहोमप्रशंसायामेव तात्पर्यं न तु निषेध इत्यात्रय
णावत् अन्यार्थप्रशंसापर्तया का वा गतिस्तप्तचक्रादिधा
रणनिषेधस्य समाश्रयणीया न तु निषेधपरत्वमेकेत्यका

मेनापि स्वीकर्त्तव्यं अतो न स्मृतिरपि विधिपरिमंथिनी तादृशी स्मृ
तिर्गगनारविंदकल्पैवेत्येव तत्वं ॥ स्वकृतश्लोकः ॥ यस्य चक्रं म
हान्नक्रचक्रे रक्षितवान् द्विपं विदार्य च चक्रपाणिं तत्तव चक्रवि
नाशनं ॥ ॥इति श्रीरामनाममाहात्म्यप्रकाशिकायां तिलकायां तिलो
केत्रयकृताश्रमविरचिते शंखचक्रविधमनं नामाष्टम अत्र के
श्चिदाधुनिकैरुक्तं तप्तचक्रधारणनिषेधकं वि... केवल
मंतबुद्धेषु बुद्धकोषेषु अदर्शनात्स्मार्त्तोपि कल्प्यः ॥ अस्तु नाम
नं तथापि विधिबलेन निषेधिकास्मृतिरपि दर्शिता वा गमिष्य
त्नि वाक्यं किंच ॥ वद्धचनं शंखचक्राद्यंकनं च गीतं तत्त्वादि

कं तथा। एकजातेरयं धर्मो न जातु स्यात् द्विजन्मन इति वचनं। यथाश्रमसाम
गं कापमनर्हे सर्वकर्म नव चक्रांकितो विप्रः सर्वकर्मसु गर्हितः
॥ शंख चक्रं मृदायसूत्रं यो धत्ते सायसेन वा॥ स शू[illegible]स्त्रिकार्यः
सर्वस्माद्द्विजकर्मणः इति निंदा च शूद्रमात्रधर्मपर[illegible] चक्रादिधा
रणस्य व्यवस्थापयंती इति चेन्न दक्षिणे भुजे विप्र इति श्रुतिवि
हितं विप्रादीनां चक्रधारणं स्मृतिनिषेधमते निंदन्ते वेत्ति वाक्यं कथ ५६
मुन्मत्तप्रलपितं न स्यात् अतो यमर्थः॥ शंखचक्राद्यंकनं नृत्य
गीतादिकरणं नामसंकीर्तनादीकमेकजातेः शूद्रस्य धर्मः इत्य
र्थः॥ गीतनृत्ययोरपि ब्राह्मणजातिधर्मतायमशौनकात्याम्भ

का। हरिगीतं विनैवाज्यत ब्राह्मणेन नरोत्तम भाषागानं न कर्तव्यं तस्मा
त्पापं च यात्वतं विष्णुगानं च नृत्यं च नटनं च तथैव च॥ ब्र[illegible]णानु
ब्राह्मणजीतीनां कर्तव्यं निजकर्मवत्॥ इत्यादि॥ अथवा यद्धर्मे
पं शंखचक्राद्यंकनं नृत्यगीतादिकं च तदेकजातेः शूद्रस्यापि
वोधयेयुर्हिताहितं॥ यथा दर्भमाननीयाश्च नार्हस्याचार्यकं कचिदिति
द्वितीयस्य त्रवचनस्य तथा चक्रांकित इति अत्र अ[illegible]प्रश्ने षेण
व्याख्येयं जातस्य च चक्राद्यंकनस्य सा द्वाक्षसंस्कार[illegible]तया सकल
कर्माधिकारापादकत्वं वचनश्रुते रूपपादयिष्यामः तृतीयस्य वयम
र्थः॥ यो मृदादिरूपैः शंखचक्रे स्वयमेव बिभर्त्ति न त्वाचार्यमुख

नमूलतस्यापिसारणस्याऽतनमध्येनशंखचक्ररहितश्चवसकस्यदिज
कर्पस्यचअनधिकाराद्बहिःकरणायोग्यइति॥यथाहुर्शांजि[illegible]ः॥आचार्य
दनाभिप्रायाःप्रायोवादस्तदक्षिणः॥अंगोपांगेष्वसंय[illegible]ःकृतोपिन
कृतोभवेत्॥एवमन्येषामपिवचनानांकृत्याद्यविरुद्धएवार्थोवर्णनी
यः विद्धार्थवर्णनेजीवितामवोछिद्यात्॥अतोनिषेधबाधादत्ते
कस्कृतिशतविहितश्रुद्धावर्णधर्मर्यवंश्रास्तणादीनांतज्ञचक्रादि ५१
धारणस्येतिसिद्धं॥अनुष्ठानबाहुल्यचवनाचारिबाहुल्यवतश्च
वनाचारिभितिसर्वंसमंजसं॥नमुनेमिनातज्ञनलचक्रकृतिः
बिलन्निअपधृतसुदर्शनं॥सतचक्रधारी॥पवित्रेणबद्धेन

सताइत्यादिनिर्वचनगणेष्वक्रमात्चधारणंविधीयतेक्वचित्तुअ
चक्रेपवित्रेछिन्नयाद्वेसुदर्शनं॥सव्येश्चशंखंबिभ्रयादितिशंखच
क्रधारणं॥अपरत्रापि॥आयुधानिबिभ्रत॥उरुक्रमस्यचिह्नै
रंकिताः॥लिंगान्यंगेतास्तकान्यपर्यंतिइतिबहुवचनेक्षर्यमाणा
नामनेकत्वंप्रतीयतेकथमेतेषांविविधकल्पितार्थानामर्थेति
निश्चयइतिचेत्तदावहितमनाःशृणुआयुधा[illegible]न्यादिषु
बहुवचमुपादेयगतत्त्वयान्येकत्वादिवद्धि[illegible]हितं[illegible]पबहुवचस्य
कपिंजलाधिकारणन्यायेनत्रित्वेपर्यवसानेप्राप्ते॥पंचायुधा
यो[illegible]णीत्यक्तिःश्रद्धोपद्दहितैरितिवचनानुसारेणपंचसंख्या

यां पर्यवसानं समाश्रयणीयं अत एव चिह्नलिंगशब्दा अपि आयु
ध विशेषपराः समाश्रयणीयाः एवं स्थिते तत्र चक्रादिधारणं पंचा
युधधारणे नानाशाखोपात्तानां वाक्यानामुपसंहा[illegible]वश्यमुररी
करणीयः तथा च सर्वेषां विकल्पो वायं चायुधधारणे विध
येकं विधयैकदेशानुवादकं च भिन्नवचनयोर्वा भवेत् तत्र
नाद्यो विकल्पो युज्यते विकल्पप्रतिपादकाकाराद्यदर्शनात् पंचा
युधधारणानुष्ठाने तदितरवचनार्थयोरप्यनुष्ठितत्वेन त्वल्पवि ५८
कल्पायोगात् शक्ताशक्तादिभेदविकल्पव्यवस्थापकवचना
दर्शनेनायुक्तत्वात् अदृष्टदोषदुष्टत्वेनागंतुकत्वाश्रयणा

पत्त्वात्तस्मादेकं वर्णिते द्वौ वर्णिते त्रीन्वर्णिते चतुरो वर्णिते न पंचवर्णि
तेस्यत्र आर्षेयवरणैकदेशानुवादमात्रमेव यथैकवरणयोराश्रि
तं तथा पंचायुधधारणविध्येकदेशानुवादनेनैव तेषां युक्ततरेति
सर्वेषां चायुधानामपि समाधारणे परस्तत्र विशेषः प्रतिकृति
कस्मिन्नेव मंत्रेण तत विष्णो अत्र चक्रे सत्पारत्यमस्ते वा क्वोदध
त्यंतेन शंखचक्रादिधारणं विधमयत्र अन्ये पुराणा[illegible]गान्यंतेता
वकान्यपर्यंतिद्रुतिकेषांचित् निशायितानाधिकारिणामेव पंचा
युधधारणात् विधानात् उक्तानां पंचायुधधारणेऽत्र अशक्ता
नां शंखचक्रधारणमिति निर्णयो रोचते तेन नु ६ दि[illegible]

विप्रो बिल्व याद्वेस्तु दर्शनं इत्यादिषु च सुवर्णं धार्यं मित्यादाव लंकरण
रूपेण प्रतीयते ॥ यथाह बृहस्पतिः जातस्य तु कुमारस्य धारयेत्
पंचमे दिने ॥ चक्रं तु बिल्वत्फ सर्वेषु मांसः स्त्रीज[illegible] अपि चेति
अन्यत्र तु चक्रं बिल्व त्रिविधं धार्यित्तव्यमिति नो[illegible]नात् प्रतन्न
रित्यादिभिश्चक्रेण तापनमत्र अपरत्र तु रुक्मस्य विकारैरंकि
ताइतिचक्रेणांकनमात्रमिति अत्र तु नेतरेतरस्यैकदेशानुवाद दे
काः ॥ आभरणादिस्वं कनादेर संभावात् अतो विकल्प एवात्र स ५५
माश्रयणीय इति चेन्नैवं वादीः लंकरणमात्र विधाने आभरणादि
रूपेणैवेति सरस्ता निर्णयस्याशंक्यत्वात् ॥ किंतु कथं लंकरणमि

ति विशेष पर्यवसानाकांक्षं भवति तत्र असति विशेषोपस्थापक प्र
माणे सुवर्णं धार्यमित्यादिवत् धारणमात्रमेवस्यात् न तापः तापं
कनं अत्र तु सर्वशाखा प्रत्यय न्यायेन सर्वेषामेकत्रोपसंहारे स
ति अश्वमेधीयं पशुमालभेत इति पशुशब्दस्य समान प्रकरणपरि
पठितछागस्यैव पायांमेदस इति मंत्रोपात्तस्य छागे पर्यवसानं च तत्र मं
त्रांतरोपात्त विशेषे पर्यवसानमेव समंजसमिति विकल्पो यु
क्तेन तत्स्व सर्व वचन निष्पाद्योयमर्थः यथा कंठे भवति तथा
ऽग्निप्रतप्तं चक्रं बिल्वयादिति यत्राभरणरूपेण धारणं बृहस्प
तिना उक्तं तत्र नित्यधारणं किंतु ग्रहादि निवारणार्थं धारणं तत्र मे

वेतिनच्तदत्रविधीयतइतिस्तू निरूपितोनीतिपयः। अनेनैवन्या
येनस्थानविध्ययकस्य प्रमाणे निर्णयो व्यवसेयः। तथाहि। चक्रं
बिन्तत्त्विचिद्रुषोत्तिशरीरेयत्रकुत्रचिद्धारणं प्रतीय[illegible]क्र चितुंमध्ये
बाहुमितिबाहुमध्यस्थानं तयात्र परत्रमूलेबाहोरितिबाहो
मूलं वा एतेषां चैकवाक्यत्वे सामान्यस्य विशेषपर्यवसाने च
स्ततिअयमर्थः स्यात् शरीरावयवेषु बाहोः क्रमस्तेन्तु उत्तमध्ये १००
चक्रं बिभृयादितिअस्मादिवन्यायान्मूलेबाहोरितिअविशे
षेण बाहुमूलस्थानकचेशखचक्रयोः। प्राप्तेवद्वितु नुजेवि
प्रो बिभृयाद्वैमृतुस्पर्शनं। सव्ये तु शंखं बिभृयादिति वचना

व्यवस्था संपद्यते अतः सर्वं सुस्थितं ननु शंखचक्रादिधारणस्याना
रभ्याधीतत्वात् स्तृतासइतितद्धंतरस्तत्रमासक्तेतिफलश्रव
णात् स्तुतार्थत्वं प्रतीयते धृतोर्ध्वपुंड्रः परमचक्रधारीतिध्यान
गतत्याक्रत्वर्थत्वं च तदुभयमपि कथमेपि कमेकस्योपयुज्य
ते इत्थं विनियोगपृथक्त्वात् यथादध्नाजुहोतिदध्नेन्द्रियकामस्य
होतव्यमिति एकस्यैव दध्नः क्रत्वर्थत्वं वा विरुद्धमिति यथावा
ज्योतिष्टोमादेः पुरुषार्थस्यापि यज्ञेन दानेनेति भागवन्ते दाब्र
न्नविद्याशेषत्वं तथात्रापि ध्यानांगत्वे पुरुषार्थत्वं चैकस्यैव तथा
प्ययं विरोधः कथं परिहरणीयः क्रत्वर्थत्वे तु केशवमस्त्वव प

नादिवत् कर्तुः संस्कारकतया कर्त्तारं प्रति गुणत्वं चक्रादिधार
स्म णस्यात् । पुरुषार्थत्वेऽपि कर्त्तुरपि पुरुषस्य कर्मार्थत्वादिकर्मशेष
त्वात् कर्त्तारं प्रति प्राधान्यं न वेदिति । एतदपि विनियोगभेदादेवा
विरुद्धं । तथाहि । नित्योदकी नित्ययज्ञोपवीतीति पुरुषार्थतया
कर्त्तारं प्रति प्राधान्यस्यैवोपवीतस्योपवीतं देवानामुपव्यय
त इति दर्शपूर्णमासांगस्योपव्यानस्य कर्तृसंस्कारकत्वेनान्यप
रत्वेऽपि विनियोगस्तेद्यावत्तद्वत्र किमिति नांगीक्रियते । अस्त्वे १०१
वं तथापि स्मृतचक्रधारी विष्णुपरं ध्यायतीति ध्यानांगस्यैव
चक्रादिधारणस्य व्यासः । तस्मादायुधं कित्तोत्तवापित्

कार्यं करोति यः । तप्तवैवं प्रतिगृह्णातिगयायां गदाधरः तस्मान्मुद्रां
कित्तो यस्तु दैवं पित्र्यं करोति यः । नित्यं नैमित्तिकं वापि अत्यर्हं चाह
र्यं तत्त्वे दित्यादि निरनेककर्मार्थता कथं युज्यत चेत् तदपि युज्यत ए
कएव एकस्याप्यनेकार्थस्यावकुशोदष्टत्वात् । यथा वेदिवर्हिः सं
स्काराणामंगप्रधानतूतानेकयागार्थत्वं । यथा वा दृष्ट्या पशुना
सोमेन वा यजेतसोमावास्यायां पौर्णमास्यां वा यजेतेति पर्वकाल
स्यानेकधर्मयागशेषत्वं तद्वत्रापि तत्रानेकशेषत्वं विनियोगवशे
नोपपद्यत एव । किंच । शुचिना कर्म कर्त्तव्यमिति शुचित्वं सकल
कर्मांगतया विगानप्रसिद्धं तस्य बाह्याभ्यंतरेत्ते देने द्वैविध्यमति

धारयच्चक्रं चिह्नादिकं वाह्यं अन्यथा गांघ्रपेततो तिबाह्यस्तु ध्यंतः प्रवेशाक
र्यं स्यात् विष्णुचक्रांकितं देहं पवित्रमिति वैष्णवेति रितिवचनं नन्व
अत्रापि येन घृत इति पावनत्वान्निक्षुनाच्चुडा चिह्नं नियतं तस्यैवा
विनत्वां युष्मनि मे इति वचनाच्च अत्रापि येन घृत इति वचना
स्व श्रुति रूपचात्मकस्य कर्मशेषता नितरां युज्यते ननु नव वेद
पित्तथाप्येकस्य कर्मणो युक्तमेव प्रयोजनमिति न्यायात्तद् १०२
ष्टार्थत्वेऽपि श्रुतासद्दृष्टं तस्त्वसमाचरन्तोति सुखानुभवः अं
कितालोके सुभगा भवामः इति सौभाग्यं भूरितेजः प्रधर्षती
ति तेजस्विवर्चस्व धंतं तथा चक्रे नित्यं धारयते नरः तेनस्य

त्वनेनत्रपेक्षसमस्यप्रवर्तते इत्यादिभिरनेकफलार्थत्वं कथमिव प्र
तिपद्यत इति चेत तदपि विद्वांसो विपांकुर्वन्तु किं कर्मेव यं वेद
एवानेकेषु विनियुक्तेनहि वेदप्रतिपन्नेऽर्थेनुपपत्तिर्नामनापि
वेदवचनस्याति भोराद दृश्यते चानेकफलार्थत्वं यथा त्रयकर्म
णां स्विष्टकृदादीनां दृष्टार्थत्वं मीमांसकाः अंगीकुर्वन्ते यथा च
यो वृष्टिकामो न्नाद्यकामो यः स्वर्गकामः सौभद्रेण स्तुवीतेति
सौत्तरस्यानेकफलार्थत्वं यथा वा सर्वेभ्यः कामेभ्यो दर्शपूर्णमा
सायोः यथा वा वैश्वानरेष्टः भूतएव तेजस्वन्नाद इन्द्रियावी
पशुमान् भवति इति इत्तया तेद्यर्थता अतो नेकफलार्थत्वं

अपियुज्यत एवं चक्रादिधारणस्य । ननुस्यादनेकार्थत्वमपि
जन्मांभोधिस्तत्त्वे । नेमिना तद्धतन्त्रब्रह्मणसायुज्यं सलोकता
माप्नोतीत्यादिभिर्मोक्षार्थत्व । मपि निगद्यते तत्कथमुपपद्य
ते । तथाहि । अस्तज्ञानैः कृसाध्यः खलु मोक्षः नस्योपायांतरम
स्ति । यथोक्तं । यदाचर्मवदाकाशं वेष्टयिष्यति मानवाः तदा
शिवम् विज्ञाय दुःखस्यांतो भविष्यतीति न कर्मणा न प्रजा
या धनेन । नाहं वेदैर्न तपसा न दानेनेत्यादिषु । अतो न चक्रा
दिधारणस्य मोक्षहेतुता युज्यते । न च वाच्यं चक्रधारणस्य विधि १०३
बलादेव सामान्यस्योपायांतर निषेधस्य संकोचो भविष्यतीति

ज्ञानेन सहास्य विकल्पेनानुष्ठानायोगात् । बहूनां जन्मनामंते ज्ञानवा
न्मां प्रपद्यत इति अनेकजन्मसंपाद्यं खलु ज्ञानं मोक्षहेतुः न च गु
रुतरेणास्य विकल्पो युज्यते तत्प्रतिपादकशास्त्रस्य अननुष्ठान
लक्षणाप्रामाण्यप्रसंगात् न च तदुक्तं । अथ मन्यसे यथा दर्शपू
र्णमासाभ्यां स्वर्गकामो यजेत ज्योतिष्टोमेन स्वर्गकामो यजेतेत्ये
कफलार्थत्वं गुरुलघ्वोरुभयोरपि तथात्रापि । भविष्यतीति तन्न
साध्यस्वर्ग वैषम्यादुपपद्यत एव दर्शपूर्णमासयाजिनोपि
ज्योतिष्टोमयाजिनोतिशायितः स्वर्गः न चात्रापि तथोपपद्यते
मोक्षस्वरूपफले वैषम्याभावात् परमानंदप्राप्तिः खलु मोक्षः

नचतत्रवैफल्यं किंचध्रुवोर्ध्वंपुंड्रःस्वतच्चक्रधारीतिमोक्षसाधनज्ञाना
गतया। विहितमेवज्ञानंविहायसाक्षान्मोक्षसाधनत।यात्तदेवविधीयतइतिचेन्मीमांसायांनिपुणैः कथंह्यस्यार्थोनस्यात् अंगस्य
प्रधानसाध्यफलसाधनत्वेऽंगिनोवैयर्थ्यप्रसंगात्। अथो
च्यते। ध्रुवोर्ध्वपुंड्रइतिमोक्षसाधन ज्ञानांगतयापरंपरया
साधनत्वेनप्राप्तमेवमोक्षलक्षणफलंचक्रधारणस्यप्र
शंसार्थजन्मांगोष्ठितत्त्वेष्वादिष्वनुपपद्यतननुमोक्षसा १०६
धनतयाचक्रधारणस्यविधिरिति। एवंचतत्रिसकलधा
र्मांगस्यतदाचक्रधारणस्यफलश्रवणंसर्वत्रतत्तदंगि

फलानुवादएवस्यादितिपुरुषार्थत्वंनस्यात् कथंअत्रनिर्वा
हइतिउच्यते। यत्रत्वेकेनैववाक्येनक्रत्वर्थत्वंफलार्थत्वंचउच
त तित्रफलश्रवणमर्थवादः यथा। यस्यपर्णमयीजुहूर्भव
तिनपापंश्लोकंशृणोति। अत्रजुह्वापर्णतयसंबंधपरत्वेवाक्यभे
दप्रसंगात्फलश्रवणस्यप्रशंसार्थत्वेनाप्युपपत्तिःक
र्तव्यर्थश्रवणस्यानन्यगतिकत्वात् फलश्रवणमर्थवादइ
तिनविवक्षितेफलं यत्रतुवाक्येनपुरुषार्थताप्रकरणे
नक्रत्वर्थतातत्रप्रकरणबाधेनवाक्यात्पुरुषार्थमेवय
थागोदोहनेनपशुकामस्यमाहिंकेनप्रतिष्ठाकामस्य

त्यादिवाक्यात् च्चर्थत्वं फलार्थत्वं न संभवत्येव प्रकरणस्य फलेऽ
षबोधकत्वायोगात् फलवदाकांक्षप्रकरणांत स्पूलत्व। दंगत्वे
एव प्रमाणमिति। यत्रापि प्रकरणान्तरस्थ अर्थानुद्रेषत:
अर्थवादात् फलार्थता तत्रापि प्रकरणस्यानन्यगतिकत्व।
न। फलश्रवणस्य प्रशंसामात्रयाप्युपपत्तेः। फलमविवक्षि
तमेव। यथा कर्मण एवयज्ञस्य क्रियते कर्मे यजमानाये
त्यार्थवादिक फलश्रवणं। यत्र च अन्योन्यनिरपेक्षवाक्य। १०५
का द्वयेन वा अन्योन्य निरपेक्षवाक्यद्वयं शेषत्व तात्पर्य
वादद्वये च अर्थत्वं फलार्थत्वं च प्रतीयते तत्र विशेषनि

र्णायकप्रमाणाभावात् अनयार्थत्वं चाश्रियते यथा दर्शः अस्य हि वाक्य
द्वयेनोभयार्थत्वं तदुच्चक्राधिकारणस्य वाक्यद्वयशेषमात्रार्थवाद
द्वयमांप्रतिपन्नमथाउभयस्याफलयार्थत्वं तं अंगीकरणीयं तथाहि
वाक्यद्वयेपि विहितं तत्र च क्राधिकारणस्य फलकांक्षायामेकत्र
संन्निहितं त्रीहरेवफलं तयान्वियते अपरत्र फलमेव तत्तयोरप्यर्थ
योरप्राप्तत्वादुक्तयत्रापि विधिरेव भवति भाग्योनुवादकता विधित्वे
संभवति निरर्थकस्यानुवादकत्वस्यायुक्तत्वात् किंच फलार्थवा
क्यानुवादकत्वं क्रत्वर्थवाक्यानुवादकत्वं क्रत्वर्थकस्य भवति त
स्मिन्वाक्ये क्रत्वर्थकस्याभवति तस्मिन्वाक्ये क्रत्वर्थकस्य कथं चिद

प्रप्रतीतेः फलवाक्यस्य क्रत्वर्थकस्य वाक्यानुवादकत्वं च फलत्वेन तस्मा
धनकत्वलक्षणायां भवति तच्चान्याय्यं वचनन्याय विरोधाभावेपिमु
ख्यया वृत्त्या फलविधिस्तत्र वे लक्षणया अनुवादत्वाश्रयणस्यायुक्त
त्वात् तत्त्वं भिन्निः थाग फलसाधकत्वमंगस्यास्ततंत्रस्यनोपप
द्यते तथात्वे भिन्नो वैयर्थ्य प्रसंगात् अतोन्याय विरोधस्त्वनुवाद
त्वाश्रयणमिति चेन्न फलतारतम्ये नांग्य वैयर्थ्यात् केवलांगसा
ध्यात्फलादतिशयितरं फलमर्थांगोपेतेनांगिनां साध्यतश्चति १०६
त्पने कोवा विरोधः यत्र चैतादृशन्याये विरोधस्तत्राग्निहोत्रादिप्रकरणस्य
मोक्षस्तुत्प्रतिपादकवाक्ये मोक्षलक्षणफलत्वेसंभवाभा
२

वात् ज्ञानव्यतिरिक्तमोक्षसाधननिषेधकवचनविरोधश्चतत्रागत्यालक्ष
णायानुवादत्वाश्रयणं नच विरोधाभावे क्वचिदनुवादत्वमा
श्रितमिति सर्वत्र तत्संगिकार प्रसंगः अतिप्रसंगात् अतः क्वच
र्थमपि चक्रादिधारणं नानाफलसाधकतया पुरुषार्थपूरं
परमामोक्षहेतुरिति सिद्धं सन्मानसरंजकः पंथाः स्वच्छत्वाक
दक्षाद्दूरे करे लोकपक्षं लोकाद्यभाषानं वदंतपपनात्तं तत्त्व
हे पुरुषोत्तमं ॥ ॥ इति श्रीरामनाममहात्म्ये श्रुतिस्मृतिपुराणोक्त
नामीके अष्टकताश्रयः नवमः प्र॰ नन्वस्तु क्रत्वर्थत्वं फलार्थत्वं च तत
फलार्थत्वं च तथापि देवानं केचित्तु भक्त ॐ नामः उपवी

तादिवद्धार्याः स्त्रां खचक्रादयस्तथेत्यादिभिर्नित्यत्वमपिश्र
नीयते तत्कथमुपपद्यते फलार्थत्वे हि फलकामनाया अ
नित्यत्वेनानित्यः प्रयोगः स्यात् कर्त्रर्थत्वेपि फलसंबं
धस्य कर्त्तारप्यनित्यत्वेन तत्प्रयुक्तस्यापि अनित्यः प्रयो
गः स्यात् एतादृशस्य कथं नित्यत्वं युज्यत इति चेत्तद २७
पि वदामः विनियोगपृथक्त्वादेवोपपद्यत इति यथाग्नि
होत्रं जुहुयात् स्वर्गकामः यावज्जीवमग्निहोत्रं जुहोत ५
ति विनियोगभेदादेकस्य काम्यत्वं नित्यत्वमपि यथा च यद्युः
पुरुषार्थत्वं च तद्वदत्रापि इति उभयत्र भावात् केचि
२

दुव्यतिपाप्मानमरातिं तरेमेत्यादिभिः पापनिवर्तकतयाश्र
यस्य त्वेतस्यानैमित्तिकत्वमपि चक्रादिधारणस्यास्ति त
पि युज्यत एव याजयित्वा प्रतिगृह्य वानन्नत्रिः स्वाध्या
यमधीयीत त्रिरात्रं वा सावित्रीमिति नित्ययोरेवाध्ययन
जपयोर्नैमित्तिकत्व दर्शनात् देवतास्य वाल्पस्त्रावृत्या
तयो यद्दुरुत्पत्त्याद्वयनत्रैधातवीयेन यजेतेति दीक्षावि
शेषत्वेन क्रत्वर्थस्यैव त्रैधातवीयस्य नैमित्तिकत्व दर्शनात्
वैश्वानरस्य नैमित्तिकत्व काम्यत्वयोर्दर्शनाच्च तस्मात् सुचिवो
त्रज्ञानात्प्रस्थित स्मकल्पकर्तुरेकस्यावस्यनाना फलवियो

गाद्य विदित्तकाम्यत्वस्य प्रायश्चित्तरूपतया प्रापितनैमित्तिकत्व
स्य प्रदानरूपश्रवणाच्च नित्यनैमित्तिकत्वं तप्तचक्रादिधारणस्य ब
ह्मपूजेन्द्रजन्मध्ये अवश्यं धार्यमिति विधेः अस्त्वेवमनेकार्थत्वं
तप्तचक्रादिधारणस्य कथमस्यानुष्ठानपरिपाटी अशेषक्र
तुशेषतयास्य सकृदेवानुष्ठानं तथाहि ॥ अविशेषांतर्भावेन ख
ल्वस्य क्रतुशेषता अविशेषं च ॥ कन्ररूपकिणसंबंधस्तस्य श
रीरस्य भवति ॥ विष्णुचक्रांकितं देहं पवित्रमिति वैश्रुति १८
रित्यंकनसंबंधेन पवित्रत्वश्रवणात् ततश्च यावत्किण
संबंधस्तावत्पवित्रत्वात् ॥ तावन्मात्रोपजीवनेनैव च

क्रादिधारणादीनां प्रवृत्तिः न पौनःपुन्येन कृतत्वश्चक्रादिधारणम
नुष्ठापयंति यथानेकांगप्रधानयागार्थानामपि बर्हिर्लवनं च न
यावत्प्रधानमावृत्तिः किंतु सकृदेवानुष्ठानं संस्कृतबर्हिषि
तत्सर्वेषां साधारणत्वात् अत्रापि यदातिथ्याया बर्हिः स उपसदा
मिति अस्य शेषत्वेन स्यान्यत्र नियोगस्तत्र संस्कारस्यावृत्तिः
बर्हिष एकत्वात् यथा वा कृच्छ्राद्यापादकानां स्नानाचमना
दीनां कृत्वा पौसकृदनुनिष्ठितानामेव सकलांगप्रधानशेष
त्वे क्रतुरेकत्वात् ॥ तथात्रापि कर्तुरेकत्वात् सकृदनुष्ठितमेव
सकलक्रतुशेषत्वमस्तु नेत तप्तचक्रादिधारणां किण रूप

ताविगमेनुपुरुष्यंकनंकर्त्तव्यंगात्रस्यपवित्रत्वार्थंअंकनसंबंधे
नैवगात्रस्यपवित्रत्वात्सदाधारणविधानाच्चनित्यकाम्ययोर
पिकाम्यत्वान्नित्यत्वसिद्धेःउभयार्थंसकृदेवानुष्ठानंएतदुभया
र्थमनुष्ठितेनैवांकनेनदेहस्यपवित्रत्वसिद्धेःत्रितयार्थंअपि
सकृदनुष्ठानंनैमित्तिकस्यतुनिमित्तेसत्यनुष्ठियमान
त्वात्अनुष्ठानस्यावर्त्तिर्निमित्तावृत्तियावन्निमित्तंनैमित्ति १७
नैमित्तिकस्यानुष्ठेयत्वात्आवृत्तिरेवानुष्ठानस्यफलार्थस्य १
तुप्रतिफलमनुष्ठानस्यावृत्तिःएकानुष्ठानेनसर्वेषांफल
नांयुगपत्सिद्ध्यसंभवात्लोकेपिघटसाधनकृत्तादण्डाद

१

योयुगपदेकमेवघटमुत्पादयंतिनानेकंप्रतिपादितोचसर्वेभ्यः
कामेभ्योदर्शपूर्णमासावितिसकासाधकस्यदर्शपूर्णमास
स्यप्रतिफलमनुष्ठानावृत्तिःसर्वकाम्याधिकारेणअतएवका
म्यस्यापिकरीर्यागादिकस्यतुनःफलाकांक्षायांअनुष्ठानाव
त्तिमंगीकुर्वंतिनतत्वज्ञाःतस्मात्प्रतिपादितैवचक्रधारणस्या
नुष्ठानपरिपाटीयुक्तानन्नुदिवानक्तंबिभृयुस्तत्रजनासइति
अविशेषेणसकलजनस्यधारणंप्रतीयतेक्वचिद्दक्षि
णेभुजेविप्रइतिब्राह्मणस्यअपरत्रधारयेद्वैष्णवःशंखं
चक्रंबाहोदक्षिणेइतिवैष्णवस्यअत्रतुसामान्यजन

शब्दस्य पशुशब्दवद्विशेषपर्यवसानसाकांक्षस्य छागादिव
विप्रादौ पर्यवसानमेव न्याय्यं न चैकदेशानुवादकत्वं
अस्य विशेषपर्यवसानानाकांक्षस्य सकलवर्त्तिसकलनियतत्वा
त्। अनुवादे प्रयोजनाभावाच्च अतो न सर्वधर्मत्वं च
क्रादिधारणस्यस्यादिति चेत्। उच्यते। यद्यपि पशुश
ब्दस्येव जनशब्दस्यापि विशेषपर्यवसानाकांक्षात्व
ति तथापि। ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चवल्लनचन्दनैः ११०
अग्निनैव तप्तं तप्तं चक्रमादाय वैष्णवः। दाह्येय
सर्ववर्णानां हरिस्थालोकाम्येद्ययो यो नरो मम तत्र

२

स्तु दिव्यं चिह्नं धारयेत्। श्वपाको वापि गोघ्नो वा ममतोषमवा
प्नुयात्। ब्रह्मवैवर्त्ते। अचक्रधारणाद्विप्रो यः श्राद्धे तो जपि
ष्यति। रेतो मूत्रपरीषाणि स पितॄणां प्रयच्छति इत्यादिवचन
गणैः सर्वाधिकारत्वप्रतीतेर्न विशेषपर्यवसानं भवति तथा
च विप्रादिशब्दानामेव विधारणावद्देशानुवादकत्वेव भव
ति न चानुवादो निःप्रयोजन इति मंतव्यं। तेषामकरणे प्रत्यवा
याधिक्यप्रतिपादनपरत्वेन सार्थक्यात्। यथा चान्ते तव द
नस्य सर्ववर्णधर्मत्वेपि तस्मात् हरिताग्निनान्तितं वदेदि
ति वचनस्यान्तवदने प्रत्यवायाधिक्यपरत्वं तथात्रा

तिब्राह्मणस्यतत्रापिवैष्णवस्यचक्राद्यधारणेप्रत्यवायबा
स्यप्रतिपादनार्थमनुवादोभवतिविष्णोर्तिक्रमेयुक्रमे
वेदंभूयस्त्वं॥ यदुक्तंवायव्ये॥ उपवीतावद्धार्याः शंखचक्रां
दयस्तथा॥ ब्राह्मणस्यविशेषेणवैष्णवस्यविशेषतः॥ अं
कयेच्छंखचक्राभ्यांदक्षिणोत्तरपार्श्वयोः॥ विप्राणांवेदवि
दुषांवै॥ष्णवानांविशेषतः॥ इतिवचतेषामकरणेप्रत्यवा १११
याधिक्यंभवति अन्यथासर्ववर्णसाधारणस्यास्यएतेषु
विशेषवचनंव्यर्थमेवस्यात॥ एवंश्रुतिज्ञातसिद्धंतप्तच
क्रादिधारणंस्येपासर्वाकयान्फपबृहयंति॥ यथाद्व

द्वमनु॥ उर्द्ध्वपुंड्रंतथाचक्रंनित्यंधारयतेनरः॥ तेनतस्याशुभंनश्ये
प्रवर्द्धतइति॥ शांडिल्यस्मृतौ॥ पष्टछत्रादिकंसर्वंगृहोपकर
ये णानिच॥ अंकयेच्छंखचक्राभ्यांनांकुर्याद्विवैष्णवंनमुद्रयेदास
नानिशयनानिमहीतलेसंस्थापयेत्तत्रमध्येतुशालांचक्रादि
चिह्निताम्भितिप्राप्ते॥ धारयेद्विष्णुभक्तस्तुचक्रंबाहौतुदक्षि
णे॥ वामेतुशंखसंज्ञानंधारयेद्विष्णुमाप्नुयात॥ चक्रेणैवां
कितोविद्वान्वासुदेवंसमाश्रयेत॥ जावन्नक्रिंसमास्थायब्र
ह्मलोकंसगच्छति॥ यथाचाग्निपुराणे॥ पंचायुधानिधार्य
णिभक्तिश्रद्धापरंहितेः॥ ललाटेश्रद्धेह्रत्कोरेवद्दथक

ललाटे तु गदा धार्या मूर्ध्नि चापं शरौ तथा हृन्मध्ये नंदकं चैव शं
खंचक्रे तु भुजद्वये । यथा च विधिवत्कल्प्य पंचायुध विशेष
तः तत्तन्मंत्रेण मूं त्रद्रः प्रतिष्ठाप्य पृथक् पृथक् । वह्निम
ध्ये समारोप्य विधिवत्पूजयेत्ततः । अंकयेद्विधिवद्भक्तम
प्रमत्तः समाहितः । वर्णाश्रमनिष्ठानामन्येषां च विशेषतः
कर्तव्यं भगवद्भक्तैः सिद्धिमुक्त्येच्छयोगिभिः । श्रीवाराह ११२
पुराणे क्षेत्रमहात्म्ये । मच्चक्रांकितदेहो यो मद्भक्तोनु विद्व
र्जितः । भावेश्यतिधर्मात्मा मदेकांतेन चेतसा । चक्रांकित
भुजाः केचिद्यत्र कुत्र वसंति हि । योजनानि तथा त्रीणि

५

कृतिसंख्यं त्रिंशतिस्तत्प्रेयं चगां त्रतन्यते वं कं च पवि[illegible] ममक्षेत्रं व
सुंधरे येकेचिद्यत्र पुरुषा विष्णुचक्रांकमुद्रिताः तेषां दर्शनमा
त्रेण महापातकनाशनं भूतप्रेतपिशाचाश्च डाकिन्यश्च वसुंधरे
सर्वे ते प्रशमं यांति यत्र चक्रांकितो वसेत् । तत्रैव शंखचक्रांकनं
कुर्यादात्मानो वा कुमुक्षवः सोश्वमेधफलं प्राप्य विष्णुलोके
महीयते । लिंगपुराणे । अष्टाक्षरविदः सर्वे विष्णुचक्रांकितास्त
थासेवका वासुदेवस्य तथैव नटनर्तकाः । अन्ये च वैष्णवा
स्तत्र सर्वे चक्रेण लांछिताः वामनपुराणे । जालया वि सि
ष्टं वेद्यस्तु बाहुमूलसुदर्शनं । कुलकोटिसमुद्धृत्य सगच्छे

द्वैष्णवं पदं॥ स्कंदपुराणे शंखचक्रांकनं कुर्यादात्मनो बाहुमू
लयोः कलत्रापत्यभृत्येषु पश्वादिषु च संपदि मत्स्याद्यांकि
तदेहो यो मद्भक्तो भुवि दुर्लभः नैवाप्नोति वशं मृत्योर्मद्भक्ता लंग
ह्यन्तरः गारुडपुराणे विश्वक्सेनः स्वयं चक्रमादायात्मनि
कर्षणं प्रयच्छति महातेजाः हरिर्भक्तानुकंपया विष्णुचक्रां
कितं देहं पवित्रमिति वैश्रुतिः चक्रांकिताय दातव्यं हव्यं ११३
कव्यं द्विजोत्तमैः तत्रैव अग्निनैव सुसंतप्तं चक्रमादाय
वैष्णवः दाहयेत्सर्ववर्णानां हरिपादाब्जोपस्थितये कूर्मपु
राणे चक्रादिधारणं चैव विष्णुसंबंधवेदनं पा तिव

त्यनिमित्तं हि बलादिचिह्नधारणं वायुपुराणे उपवीतादिवद्धा
र्यः शंखचक्रादयस्तथा ब्राह्मणस्य विशेषेण वैष्णवस्य वि
शेषतः आदित्यपुराणे चक्रादिधारयेद्विप्रो ललाटे मस्त
के भुजे पातकादिविशुद्ध्यर्थं सर्वक्लेशविनाशनं गरुड
पुराणे मदादिचिह्ननामांकाः शंखचक्रांकितानराः
निःशंकाश्च निरातंकास्ते मे संकर्षणाः किंकराः ब्रह्मवैव
र्ते चक्रांकितभुजं विप्रं यो वै निंदति मूढधीः स याति न
रकं घोरं यावदाभूतसंप्लवं तत्रैव विष्णोत्तरपुराणे चक्रांकि
तभुजं दृष्ट्वा यस्तु नाभिवादयेत् तिर्यग्योनिशतं गत्वा विष्ठा

यांयाऊतेह्लमिः मार्कंडेयपुराणे शंखचक्रांकनंकुर्यादात्म
नो बाहुमूलयोः सोश्वमेधफलंप्राप्यपरं निर्वाणमृच्छति
तद्धारको नरः पापैर्मुच्यते नात्र संशयः ब्राह्मे ऊर्ध्वपुंड्रं शि
खाबंधं चक्रलांछनसंयुतः चक्रलांछनहीनस्तु विप्रो सौ
निःफलो भवेत् तत्रैव यो नरो मम भक्तस्तु देवं चिह्नं न धा
रयेत् श्वपाको वापि गोघ्नो वा ममलोकमवाप्नुयात् श्रीभा ११८
रते चक्रांकितस्य सान्निध्ये यः करोति प्रयत्नतः स्नानं
दानं तपो होमस्तत्सर्वमक्षयं भवेत् संवत्सरेण यत्पापं म
नसा कर्मणा कृतं तत्सर्वं नश्यते शीघ्रं सद्यश्चक्रांकदर्शना

त् काशीखंडे अचक्रांकितं यद्देहो द्भूरगान्नमयं भवेत् संवत्स
रेण यत्पापं मनसा कर्मणा कृतं तत्सर्वं नश्यते शीघ्रं सद्यश्चक्रां
कदर्शनात् विचरंति यथाकामं पुण्यतीर्थप्रशंसिनः भारते भी
ष्मपर्वणि ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः अर्चनी
यश्च सेव्यश्च नित्ययुक्तैः स्वकर्मसु सात्वतं विधिमास्थाय गी
तः संकर्षणेन यः यत्र लक्षणशब्दः सामान्यत्वेपि सात्वततंत्र
विहितलक्षणपरत्वात् तत्र तत्र चक्रांकनस्य विहितत्वात्
तस्य तत्परत्वमेव हरिवंशे चक्रांकिताः प्रवेक्ष्यामि यावदाग
मनं मम तत्रैव विष्णुधर्मे यमकिंकरसंवादे भवतां त्वमता

मत्रविष्णुसंश्रयस्त्वन्यथा ॥ ममाज्ञांत्वंगच्छतैवन्न विष्णातिनसंश्र
यः ॥ वसतिहृदये यस्य सोऽव्यथात्मा भुरुषवरस्य न तस्य दृष्टि
पाते ॥ तवगतिरथवाममास्ति चक्रप्रतिहतवीर्यबलस्य सोन्य
लोकः इति ॥ विष्णुपुराणगतो हरिकिंकरसंवादोपिवर्णित
यः ॥ हरिवंशे ॥ नान्यंदेवंनमस्कुर्यान्नान्यंदेवंनिरीक्षयेत् ॥ च
क्रांकितः सदातिष्ठेन्मद्भक्तः पांडुनंदन ॥ ब्रह्मांडेपि ॥ अनेक
धा प्रतिपादितं ॥ विष्णुरहस्ये प्रथमोध्याये ॥ वैष्णवामुनयः
श्रेष्ठाः ॥ विष्णुलक्षणलक्षिताः ध्यानिनोयोगनिरताः सदा
विष्णुपरायणाः इति तस्मिन्नेव ब्रह्मनारदसंवादे ॥ सुद ११५

१

र्शनेन यस्यांगं लांछितं जन्मवेस्मदा द्देहे तस्य वसेन्नित्यं श्रियायुक्तः
स्वयंहरिः ॥ लक्ष्म्यायुधांकितं वर्ष्मदृष्ट्वा वैशांकते यमः ॥ उपसर्गा ह
यं यांति रोगानश्यंति तस्य च ॥ यत्फलं ॥ यत्फलं कपिलादाने
रविग्रहशोककुरुक्षेत्रे ॥ लक्ष्मचक्रांकितदेहे तत्फलं समवा
प्नुयात् ॥ चक्रांकितशरीरस्यांते हे मुक्तिः करे स्थिता ॥ श्मशानम
पि शुद्धं स्यात् किंपुनः शुद्ध एव तु मर्त्यः ॥ तत्रैव वृत्रवधप्रसंगे ॥ ततः
प्रभृति शक्राद्याः सर्वे देवा मुनीश्वराः ॥ विष्णोर्लक्ष्मायुधादी
नां नित्यं कुर्वंस्यतं द्धिताः ॥ ऋषयः सिद्धगंधर्वाः पातालपन्नगे
श्वराः ॥ देहे कुर्वंति नियतं शंखचक्रादिलांछनं ॥ तस्मात्त्वमपि

राजेंद्र कृष्णायुधांकितं स्वदेहं तव सर्वत्र सर्व। सिद्धिर्भवि
ष्यति तत्रैव ब्रह्मांडे॥ नारायणायुधै र्नित्यं चिह्नितो यस्य वि
ग्रहः। पापकोटिशतं दग्धं तस्मिन्दृष्टे न वेक्षदा। राक्षसाश्च पि
शाचाश्च दानवा दैत्यजादयः। कृष्णायुधांकितं देहं दृष्ट्वा न
श्यंति दूरतः। चक्रादिनां कितं देहं यः श्राद्धं कुरुते नरः। विधि
हीनं भवेच्चापि पितृणां तज्जयास्तमं चक्रांकितस्तनुर्विप्रो न ११६
न क्रियस्य वेश्मनि। तदन्नं स्वयमश्नाति पितृभिः सह केश
वः। कृष्णायुधांकितो न्नु ब्राह्मणायान्नं प्रददाति यः। तत्सर्वं
प्रतिगृह्णाति गयायां गदाधरः। कृष्णायुधांकितो

स्त्वाजलान्नं प्रददाति यः। तदन्नं मेरुणा तुल्यं तज्जलं सागरोपमं
यस्यांतकाले गात्रं च लांछितं चायुधैर्हरेः दृष्ट्वा शीघ्रं पलायंते
यमेन सह किंकराः। कृष्णायुधांकितो यस्तु देवं पित्र्यं करोति यः
नित्यं नैमित्तिकं वापि सत्यं हं चाक्षयं भवेत्। इत्यादि तथा तस्मि
न्नेव ब्रह्मांडे मोक्षधर्मे उमामहेश्वरसंवादे श्रीवैष्णवमाहात्म्ये ई
श्वर उ० साधु साधु महादेवि साधूनां च हितैषिणि वैष्णवानां
माहात्म्यं वक्ष्यामि तव सुव्रते शंखचक्रांकितान्विप्रान्यः प्र
जयति मानवः स साक्षाद्विष्णुसामीप्यं लभते नात्र संशयः
विष्णुचक्रांकितं विप्रं यो दृष्ट्वाप्यभिवादयेत्। ललाटे पांशु

संख्यानिब्रह्मलोकेमहीयते॥सगोत्रंयद्यपिश्राद्धेचक्रांकि
तभुजेचरेत्॥तस्माद्विष्णुसामीप्येनत्पितावैव्रजेत्सह॥
विष्णुचक्रांकितंदृष्ट्वायःश्राद्धंयच्छतांजलिः स्वकीयंकुल
मुद्धृत्यविष्णुलोकेमहीयते॥विष्णुचक्रांकितभुजः पंक्ति
मुक्तेश्चयोनरः॥सापंक्तिःसर्वलोकेषुदेवपंक्तेश्चगीय
ते॥अष्टकेमासकेवापिचक्रांकितभुजंचरेत् घोरात्कुलं
समुद्धृत्यब्रह्मलोकेमहीयते॥शंखचक्रांकितंदृष्ट्वा योवि
प्रोल्हादतोनवेत्॥परमानंदमाप्नोतिकिंपुनर्विष्णुकिंफलं
॥येकेचिद्यत्रपुरुषाविष्णुचक्रांकमुद्रिताः तेषांदर्श

नमात्रेणमहापातकनाशनं॥चक्रांकितस्यनामानियोवदेद्भक्तिमा
न्नरः॥सर्वपापविनिर्मुक्तःसयातिपरमंपदं॥चक्रांकितायविप्रा
ययोन्नपानंददातिसः॥सिक्थसंख्यानिवर्षाणिब्रह्मलोकेमही
यते॥विष्णुभक्तायविप्रायचक्रचिह्नायमानवः॥गोचर्ममात्रां
भूमिंतुदत्वाराज्यमवाप्नुयात्॥अग्निनातप्तचक्रेणबाहुमूले
प्रलांछिताः॥सर्वपापानिसंतीर्यंत्रविष्णुंतिश्वरोपमाः विष्णु
स्थानेष्वमुख्येषुब्राह्मणाचक्रलांछिताः॥तेहिविष्णुमयास्त
याविष्णुसायुज्यमाप्नुयुः॥विष्णुचक्रांकितायत्रवसंतिनरपुं
गवाः॥तद्देशोत्पन्नमात्राश्चवैष्णवंवैलभंतिहि॥विष्णुचक्रां

कित्तो विद्वान्यस्मिन्देशे वसेत्सुधीः ॥ तद्देशमंडलं पुण्यं वैष्णवानां प्रि
यं विदुः ॥ विष्णुचक्रांकितं विप्रमेकरात्रं तु वासयेत् ॥ विष्णुलोक
निवासी स्यात्स पुत्रपौत्रसंयुतः ॥ अन्नपानादिना पूजां यः करोति
स मानवः ॥ चक्रांकिताय विप्राय विष्णुसायुज्यमाप्नुयात् ॥ च
क्रांकिताय विप्राय कन्यादानं करोति यः ॥ परमानंदमाप्नोति
तद्विष्णोः परमं पदं ॥ विष्णुभक्ततमा मुख्या चक्रशंखादिचिह्नि
ताः क्रीडार्थमपि यच्छयुः स धर्मः परमो मतः ॥ यस्मिन्तीर्थे ११९
न्तत्स्नाना वैष्णवाश्चक्रलांछिताः ॥ तस्मिन्स्नानं प्रकुरुते वि
ष्णुलोकमवाप्नुयात् ॥ अतिपापयुतः कोपि विष्णुचक्रांकित

स्य तु ॥ पादोदकं पिबेद्यस्तु सर्वपापैः प्रमुच्यते ॥ चक्रांकिताय
विप्राय विष्णुभक्ताय धीमते ॥ भिक्षामात्रप्रदानेन वैष्णवं भ
क्तिमाप्नुयात् ॥ चक्रांकिताय विप्राय महादेव महामते ॥
शाकमात्रप्रदानेन मुक्तिं यांति हि सुव्रत ॥ यः पादोपवित्रं तु तो
विष्णुचक्रांकितस्य तु ॥ प्रक्षालनं द्विजः कुर्वन्नात्मशुद्धिं करो
ति हि ॥ चक्रांकितद्विजवरं यो दूषयति मानवः ॥ स चांडालो
महादेवि रौरवं नरकं व्रजेत् ॥ ब्रह्महत्या सुरापानं स्तेयं गुर्वं
गनागमः ॥ चक्रांकितस्य निंदा च पंचैते ह्यतिपातकैः ॥ यः प
त्रपित्तरं द्वेष्टि तं विद्यादन्यरेतसं ॥ चक्रांकितं च यो द्वेष्टि तं वि

द्यां दन्यरेतसां॥ ब्रह्मचारी गृहस्थो वा वानप्रस्थो यतिर्भिक्षुकः॥ अवश्यं
धारयेच्चक्रमग्नितप्तमतंद्रितः॥ ब्रह्मचारी गृहस्थो हि वानप्रस्थो
यतिर्भिक्षुकः॥ यस्तु एवं करुते न स शंखचक्रविवर्जितः॥ यज्ञो दा
नं तपो होमः भोजनं पितृतर्पणं॥ चक्रलांछनहीनस्य विप्रस्य निः
फलं भवेत्॥ इत्यादीनि वचनानि स्वयमेव द्रष्टव्यानि एतेन म
न्वादिभिरनुपादानचोद्यं निरस्तं। मन्वादिभिरनुपादानं चो
द्यं निरस्तं तस्यापि स्मृतिपुराणेतिहासवचनात्सर्वोपात्तस्य ध ११९
र्मत्वाद्वेदवनत्वेकपेवस्मृत्यास्सर्वे आचारा उपात्ताः स्मृतिष्वपि
सर्वशास्त्रप्रत्ययन्यायस्यांगीकृतत्वादिति॥ स्वकृतश्लोकः॥

देवेंद्रस्य शरीरं यो हिरण्याक्षस्य सत्करः॥ यज्ञेशो गदया निचाध
पातुं नो भितं हरिः॥ इति श्रीरामनाममरुतत्त्वे श्रुतिपुराणेतिहासो
क्तश्रुक्ता रामग्रंथे शंखचक्रविधानम् ॥ एवमनेकश्रुतिस्मृतीतिहास
पुराणप्रसिद्धं तप्तचक्रादिधारणं भगवच्छास्त्रेण प्रतिपाद्यते
॥ तथा हि श्रीविष्णुतत्त्वे नरकप्रस्तावे॥ चक्रांकितोत्स्या बिभ्यंति
देस्या नारकराक्षसाः॥ असमानक्रियैस्तेषां संहर्तं झरिवर्जंगम
न्॥ कालेनैतावतात्तेभ्यो नरकेऽप्यवकश्चन॥ मद्वत्पत्तमहादवि
मस्तापात्परमेष्ठिनः॥ तत्रैव तृतीयपटले॥ विष्णुपिताश्च तथा
शिष्याश्चक्रलिंगसमन्विताः॥ देवा एवमवंत्येतेनान्येषां कर्म

कारकाः ॥ अतिऊपटले ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थोथ भि-
क्षुकः ॥ अवश्यं धारयेच्चक्रमग्नितप्तमतंद्रितः एतेष्वाश्रमि-
णः प्रोक्ताश्चत्वारः क्रमयोगतः ॥ शंखचक्रधराः सर्वे सम्य-
क्प्रतिनिष्ठिताः ॥ सर्वे न युरिति शेषः ॥ श्रीमद्विष्णुमंदिरप्र-
तिष्ठाध्याये ॥ प्रतिष्ठादिवसं ज्ञात्वा चाहूय द्विजसत्तमैः ॥
एकांतमनुमृश्ये स्तुकृतचक्रादिलक्षणैः ॥ यजमानाः प्र-
कुर्वंति वेद्यादिस्थापनं हरेरिति ॥ पराशरसंहितायां ॥ १२०
श्रोत्रियो विष्णुभक्तश्च गृहस्थः शास्त्रवित्तमः चक्रचि-
ह्नधरो विप्रः प्रतिष्ठां कर्तुमर्हति ॥ तेन प्रतिष्ठितस्त-

त्र संनिधत्ते स्वयं हरिः ॥ नास्तिको वेदहीनो वा न प्रतिष्ठां समाचरे-
दिति ॥ नारदीयपद्धतौ ॥ गृहस्थः श्रोत्रियो विप्रो नित्यकर्मरतः
शुचिः ॥ शंखचक्रधरो दांतः सत्कुलो विजितेंद्रियः ॥ न्यस्तांगः
कर्मदक्षश्च प्रतिष्ठां कर्तुमर्हति पारमेश्वरसंहितायां एवं तद्-
या विप्राश्च क्षत्रिया वैश्यजातयः ॥ मोक्षोपायास्तथान्ये च न-
त चिह्नविवर्जिताः ॥ न भवेयुः सर्वथा तस्माच्छंखचक्रगदांबुजैः
लांछैरनलसंतप्तैः सत्कर्मं त्रसुमंत्रितैः ॥ अजितैरर्च्य पादाद्यै-
रंकितव्याः क्षणेन तु ॥ त्र्यंतज्ञानसंपन्नो यथोक्ताचारतत्परः

विप्रास्तैस्तैश्चशूद्राश्च यदेवत्वं तल्लक्षणैः तत्तद्योग्या विज्ञेयाः
समर्थाश्रवणादिषु ॥ ज्ञात्वोदितासु सर्वासु धातुश्चाभ्रमलोम
ते योग्योपकरणान्येवमप्युपीठादिकान्यपि । सलांछनान्यथा
योग्यं शंखचक्रादिलक्षणैः तथा यानासनादीनि विज्ञेः
सर्वाणि यन्त्रतः स्वात्मोपकरणं सर्वमासनादिविवर्जितः
अंगुलीयकपर्यन्तं भूषणं कटकादिकं उत्तरीयं समुद्य १२१
यैः सर्वमुष्णीषपूर्वकं ॥ चक्रादिलांछनं कुर्यात्तदीयाश्च
गजादयः । विप्रादिभिश्च कर्त्तव्यास्तदीयाम्बुरुहादयः । लां
छितश्चाप्ययथायोग्यं शंखचक्रांकलक्षणैः आरधकाद्यैः

कर्त्तव्या एवं चक्रादिलांछिताः देवतान्तरचिह्नैश्च कर्मण्यादि
लांछिताः । सनत्कुमारसंहितायां सुवर्णरौप्यताम्राद्यैर्लोहै
स्तत्र तथैव च ॥ तथा रथांगमब्जारं सुनाभं च सुवृत्तकं ज्वाला
चतुष्कसंयुक्तं लब्धा चैवं विधानत इति ॥ अग्नौ प्रताप्य विधि
वद्धारयेद्भक्तिसंयुत इत्यादि गुरुडसंहितायां ॥ श्रीभगवानु
वाच ॥ ॥ शृणुष्वं विहगेशान सदा रोचवचनं मम ॥ श्रुतिस्मृति
स्वरूपेण ऊगतामुपकारकं सर्वधर्माधिकारस्य च शुचीनाम
वनोदितः शुचित्वं नियतं तस्य यो बिभर्त्यायुधानि च ॥ अ
श्वमेधसहस्रस्य वाजपेयायुतस्य च ॥ यत्फलं श्रुति यत्तते

स्मान्मदीयायुधधारणात्॥ पर्वताग्रे नदीतीरे देवतायतनेषु च॥
तपसा यत्फलं प्राप्तं मदीयायुधधारणात्॥ तद्धारणविधिं व
क्ष्ये महापातकनाशनं॥ चक्रशंखौ समाराध्य गंधपुष्पादि
भिः शुभैः॥ अनवद्यं च नैवेद्यं विनिवेद्य च भक्तितः॥ सुदर्शन
नमस्तेस्तु पांचजन्य नमोस्तु ते॥ इति मंत्रं समुच्चार्य नमस्कु
र्यात्पुनः पुनः॥ ततः पावकमभ्यर्च्य जुहुयाद्वै स्रुवाहुतिः॥ १२२
षट्कोणे च तथा मंत्रैस्तैश्चैव जुहुयात् घृतं॥ षडाहुती स्रुते
न वा द्युघ वा षोडशाहुतीः॥ चक्रं च पांचजन्यं च तस्मिन्नग्नौ वि
निक्षिपेत्॥ पुनश्च पूजा कर्त्तव्या गंधपुष्पोपहारकैः॥ म

न्त्रानन्यनुज्ञाप्य तत्पात्रे समे सुधीः॥ अग्निनैव संतप्तं च
क्रमात्तापयमामकौ॥ दक्षिणं बाहुमूलं तु देहे विगतसाध्वसः
॥ अन्यथान्येन केनापि वैष्णवेन महात्मना॥ वांछितं विजया
चक्रं पांचजन्यं तथैव च॥ उच्चारयन्निमं मंत्रं हृदये भावि वि
न्तयेत्॥ सुदर्शन महाज्वाल सूर्यकोटिसमप्रभ अज्ञानांध
स्य मे नित्यं विष्णोर्मार्गं प्रदर्शय॥ इति॥ सुदर्शनमंत्रः॥ इति मंत्रं
समुच्चार्य दक्षिणं बाहुमंकयेत्॥ पांचजन्य निजध्वानध्व
स्तपातकसंचय॥ पाहि मां पापिनं घोरं संसारार्णवपातितं
॥ इति शंखमंत्रः॥ इति मंत्रं समुच्चार्य दक्षं भुजं तथा॥ प

एतेन प्रकारेण शंखं चक्रं च धारयेत् त्रिभुवे लोकघसंदिग्धं
मङ्कर्क इति गीयते॥गरुड उवाच॥ ॥चक्रादिधारणं देवघो
रसंसारतारकं॥अत्राधिकारिणां ब्रूहि विधिवत्पुरुषोत्तम
॥श्रीभगवानुवाच॥ ॥गुरुत्मन्न विशेषेण सर्ववर्णेषु यं
विधिः आरभ्यादि सर्वलोकस्य मम प्रीतिकरः परः॥ विप्रो
वा यदि वा क्षत्रो वैश्यः शूद्रस्तथैव च॥अन्त्यसंकरजातस्य
चक्रांकाः मम वल्लभाः॥चक्रांकिता यदातव्यं स्त्रीकन्यादि १२३
ऋतये॥यो ददाति नरः प्राज्ञः स नवेत्पुरुषोत्तमः॥पवारीरे
यस्य कस्यापि दृश्यते वा सुदर्शनं॥तस्मै कुर्वन्ति पद्मोत्रि

नमस्कारं सुराध्यः॥चक्रांकितमनादृत्य योन्यस्मै प्रददाति
च॥हव्यं कव्यं स वै याति नरकं नात्र संशयः॥ मच्चक्रांकित
देहेन यस्तु द्वेषं समाचरेत्॥ वृद्धात्पुरुषं किंचित्समहे
श्रीन संशयः॥तस्मात्सर्वप्रयत्नेन मङ्कर्केति तमाचरेत्॥स
वांपचारेर निशांतोषितोऽहं न संशयः॥एवमन्यत्रापि दृष्ट
म्॥अस्य पंचरात्रशास्त्रस्य स्वतः सर्वज्ञः परमकारुणि
कनारायणप्रणीतस्य वैदिकपरिग्रहहृदमत्सर्वं पं
चमवेदमहनीयत्वादिभिः विप्रलिप्साभ्रमत्ववानिर्णय
स्य श्रुतिभारायणादिभ्यो तिशायितत्वं वेदतुल्यमेव

प्रामाण्यमिति द्रष्टव्यमेवं नैरपेक्ष्यं कि एवं श्रुतिस्मृतीतिहाससात्त्वि
कपुराणसदागमवचनद्वारा निर्णीतावश्यकानुष्ठानस्य
तप्तचक्रादिधारणस्य सदाचारेपि प्रामाण्यभावे अनुभ
वति प्रतिपादितं हि प्रामाण्यं सद्यो दाचार श्रुत्याद्यत्रयेय
दित्ते॥ कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्॥ ये त
त्र ब्राह्मणाः संमर्शिनः युक्ता आयुक्ताः। अलूक्षा धर्मका
मास्युः॥ यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः स्मृतिश्च॥ २२४
वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां॥ आचारश्चैव
साधूनां आत्मनस्तुष्टिरेव च॥ श्रुतिस्मृतिसदाचारद्वारा

द्विवा॥ एवं सति कलौ खलु भविष्यंति नारायणपरायणाः॥ क्वचित्क
चिन्महाभाग द्राविडेषु च भूरिशः॥ ताम्रपर्णी नदी यत्र कृतमाला
पयस्विनी॥ कावेरी च महाभागा प्रतीची च महानदी॥ इत्यादि
महर्षिसंमतैः शिष्टैरनुष्ठानात् तप्तचक्रादिधारणस्य धर्मत्वं
सिद्धं॥ यत्तु दृष्टं प्राच्यादिभिरनुष्ठीयमानं तत् यत्ते इति न तु रखिबा
ह्यास्तु बाह्लीकाहस्तिनस्मृतिकथिता॥ कलौ जगत्पतिं विष्णुं
सर्वस्रष्टारमीश्वरं। नार्चयिष्यंति मैत्रेय पाखंडोपहता नराः
इत्यादिबाह्लीकाहितनाम सज्जनानुष्ठातॄणां प्राच्योदीच्यादीनां
सर्वेषामशिष्टत्वं कथमवगम्यते। इति चेत्। उच्यते नारद

पंचरात्रा सर्वेषामेव धर्माणामुत्तमो वैष्णवो विधिः। स्वपनेस्त
नवाब्रेश्वनंद्या नारायणस्य च नारायणैकनिष्ठस्य याया
चेष्टा तदर्चनः प्रायो जपः सम्यक् ऊपस्तथा ध्याननीरीक्षणं।
तत्पादांबुजं तीर्थं तदुच्छिष्टं च पावनं। तदुक्तिमात्रं मंत्राग्र्यं
तत्स्पृष्टमखिलं शुचिः तत्कृत्जनसंमर्दपादस्पर्शविसर्जना
त् चतुःसागरपर्यंता पावनास्याद्वसुंधरा॥ जाह्नव्यादीनि
तीर्थानि पापानि स्मृतिहेतवे॥ कांतिहरिदाससमर्चनेह १२५
रिपादवात त्रमवो भगवद्भक्तो स्त्वादृशाः सततं द्विज इ
त्यादि तिनि भगवद्भक्तानां तत्स्वरूपं शिष्टाचारं च गतानां

त्तोख्यातं गीतं तत्र चक्रादिधारणं हरिवाध्याए वनादृयं ते
प्रायशो भ्रांतस्तेषाम शिष्टत्वं॥ तथोक्तं पुराणसमुच्चये॥
चतुर्वेदविप्रो विप्रो वासुदेवं न विंदति वेदभारभराक्रांत
